# SANKHYA AND VEDANTA

## CORE COURSE

FOR

## BA SANSKRIT

VI SEMESTER

(2011 ADMISSION)

UNIVERSITY OF CALICUT

SCHOOL OF DISTANCE EDUCATION

CALICUT UNIVERSITY P.O., MALAPPURAM, KERALA, INDIA - 673 635

# UNIVERSITY OF CALICUT

SCHOOL OF DISTANCE EDUCATION

BA SANSKRIT

VI SEMESTER

CORE COURSE

# SANKHYA AND VEDANTA

***Prepared by:***

DR. LAKSHMI SANKAR,
ASST. PROFESSOR,
DEPT. OF SANSKRIT,
SREE KRISHNA COLLEGE,
GURUVAYOOR.

***Scrutinised by:***

DR. K. JAYANARAYANAN,
ASSSOCIATE PROFESSOR,
DEPT. OF SANSKRIT,
SREE KERALA VARMA COLLEGE,
THRISSUR.

***Layout by:***

Computer Section, SDE

(c)
Reserved

# CONTENT


| | | | |
|---|---|---|---|
| Module I | - | SEMKHYAKERIKA OF LAWARAKIAUA | Page 4-33 |
| Module II | - | VEDENTASERA OF SADENANDA | Page 34-46 |

# MODULE - I

# सांख्यकारिका

'सांख्य' शब्दः 'सम्' उपसर्गपूर्वक 'चक्षिञ्' (ख्याञ्) धातोः 'अण्' प्रत्ययेन निष्पन्नः। अस्यार्थः 'सम्यक्ख्यानम्' इति प्राप्यते। अत्र प्रकृति-पुरुषयोः विवेक-विचारः, गुणात्रयविचारः, पुरुषस्वरूपविचारः, सृष्टिविचारः, महदहंकारादीनां च सम्यग् विवरणं समुपलभ्यते। 'संख्यावान् पण्डितः कविः' इति कोशवचनानुसारेण संख्यावान् एव पण्डितः भवति। अमरकोशकारस्य मते तु 'संख्या' शब्दस्यार्थः 'चर्चा विचारणा' वाऽस्ति' (संख्या चर्चा विचारणा)। रामतीर्थभट्टाचार्यमहोदयः 'सांख्य' शब्दं परिभाषमाणः लिखति, - "पंचविंशति-तत्वानां विचारः सांख्यम्, तमधिकृत्य कृतो ग्रन्थः सांख्यमुच्यते।" श्रीदेवस्वामी - मतानुसारेण तु "सम्यक् क्रमपूर्वकं ख्यानम् कथनं यस्याः सा संख्या क्रमपूर्वक - विचारणा।" मत्स्यपुराणो उल्लिखितमस्ति, "सांख्यं संख्यात्मकत्वाच्च कपिलादिभिरुच्यते।" अहिर्बुध्न्यसंहिताकारः सांख्यदर्शनम् अभिलक्ष्य लिखति-

संख्यां प्रकुर्वते चैव प्रकृतिं च प्रचक्षते।
तत्त्वानि च चतुर्विंशति तेन सांख्यं प्रकीर्तितमः।।

इत्थं प्रकृति - पुरुषयोः पृथक्-पृथक् संख्यानम् सांख्यम्, अथवा प्रकृति - पुरुषयोः पृथक् - पृथक् संख्यया अपवर्गः इति सिद्धान्तेन वा सांख्यशब्दस्य सार्थकता सिद्ध्यति।।

**दुःखत्रयाभिघाताज्जिज्ञासा तदपघातके हेतौ।**
**दृष्टे साऽपार्था चेन्नैकान्तात्यन्ततोऽभावात्।। १।।**

**अन्वयः**- दुःखत्रयाभिघातात् तदपघातके हेतौ जिज्ञासा (भवति), दृष्टे उपाये (सति) सा (जिज्ञासा) अपार्था (भविष्यति इति) चेत्? न (कस्मात्?) एकान्तात्यन्ततः अभावात्।

**भावार्थः**- लोकेऽस्मिन् प्रत्यात्मप्रतिकूलवेदनीयं पिडाऽपरपर्यायं आध्यास्मिकाऽऽधिदैविकाऽऽधिभौतिकरूपं त्रिविधं यत् दुःखजातां, तदसह्याभिसम्बन्धात् नुन्नस्य पुरुषस्य तादृशदुःखत्रयाभिभावके हेतौ [तदभिभवसमर्थविवेकज्ञानसाधनतत्त्वज्ञान-विनिर्णयात्मकप्रकृतशास्त्रे] विविदिषा भवति। ननु लोकप्रसिद्धदृष्टोपायैरेव तदुत्छेदे सुलभे सति उक्तेयं विविदिषा व्यर्थेति चेन्न। दृष्टेन हेतुना दुःखनिवृत्त्यवश्यंभावस्य पुनर्दुःखानुत्पादस्य च असंभवात्।। १।।

**दृष्टवदानुश्रविकः स ह्यविशुद्धिक्षयातिशययुक्तः।**
**तद्विपरीतः श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानात्।। २।।**

**अन्वयः**- आनुश्रविकः (अपि) दृष्टवत्, हि स अविशुद्धिक्षयातिशययुक्तः (अस्ति), व्यक्ताव्यक्तज्ञ विज्ञानात् तद्विपरीतः श्रेयान्।

**भावार्थः-** ननु तर्हि वेदोक्ताः अदृष्टोपायाः यागादय एव स्वीक्रियन्ताम्, दुःखास्सर्वे अपहताः भवेयुः, इति चेन्न। वैदिकाः यागादिक्रियाकलापरूपाः उपाया अपि दृष्टवदेव आत्यन्तिकदुःखनिवृत्त्यनुपाया एव। यतः तेऽपि पशुहिंसादिसम्बन्धात् पूर्णशुद्धिविहीनाः, कालविशेषक्षीयमाणाल्पफलमात्रजनकाः, स्वापेक्षया अतिशयतफलविशेषसत्तासूचकाश्च। अतः तदृशदोषसर्वस्वरहितः व्यक्ताव्यक्तपुरुषरूपतत्त्वत्रयविज्ञानजन्यः सत्त्वपुरुषान्यताप्रत्ययरूपः परिशुद्धः उपाय एव प्रशस्यतरो भवेत्।। २।।

**मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।**
**षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः।। ३।।**

**अन्वयः-** मूलप्रकृतिः अविकृतिः, महदाद्याः प्रकृतिविकृतयः सप्त, विकारः तु षोडशकः, पुरुषः न प्रकृतिः न विकृतिः।

**भावार्थः-** तेषु च तत्त्वेषु - मूलप्रकृतिः कस्याप्यन्यस्य विकृतिरूपा न भवेत्। महान् अहङ्कारः पञ्चतन्मात्राश्चेति सप्त अग्रिमतत्त्वान्तराणां उपादानानि मूलप्रकृतेः कार्यरूपाणि च। पञ्च ज्ञानेन्द्रियाणि, पञ्च भूतानि, मनश्चेति षोडश केवलं कार्यरूपाण्येव, न तु तत्त्वान्तरोपादानानि। पुरुषस्तु कूटस्थनित्यः अपरिणामीति न कस्यचिदुपादानरूपः नापि कार्यरूपश्च।। ३।।

**दृष्टमनुमानमाप्तवचनं च सर्वप्रमाणसिद्धत्वात्।**
**त्रिविधम्प्रमाणमिष्टं प्रमेयसिद्धिः प्रमाणाद्धि।। ४।।**

**अन्वयः-** प्रमाणात् हि प्रमेयसिद्धिः (भवति), सर्वप्रमाणसिद्धत्वात् दृष्टम्, अनुमानम्, आप्तचनं च (इति) त्रिविधं प्रमाणम् इष्टम्।

**भावार्थः-** अक्तानामेषां तत्त्वानां प्रमेयरूपाणां अवगतिः प्रमाणविशेषायत्ता। प्रमाणानि च - प्रत्यक्षं अनुमानं शब्दश्चेति त्रिविधान्येव। अन्यानि चान्यैः प्रमाणत्वेनाभिमतानि एष्वेवान्तर्भवन्तीति, न पृथक्प्रमाणत्वेन परिगणनामर्हन्ति।। ४।।

**प्रतिविषयाध्यवसायो दृष्टंत्रिविधमनुमानमाख्यातम्।**
**तल्लिङ्गलिङ्गिपूर्वकम् आप्तश्रुतिराप्तवचनं तु।। ५।।**

**अन्वयः-** प्रतिविषयाध्यवसायः दृष्टम्, अनुमानं, त्रिविधं, आख्यातम् तत् लिङ्गलिङ्गि पूर्वकं, आप्तश्रुतिः आप्तवचनं तु।

**भवार्थः-** तत्र विषयव्यापृतेन्द्रियाधीनं ज्ञानं प्रत्यक्षप्रमाणम्। व्याप्यव्यापकभावज्ञानपुरस्सरं यत् व्याप्यस्य पक्षवृत्तिताज्ञानं तज्जन्यं व्यापकज्ञानं अनुमानम्। तच्च त्रिविधम् - पूर्ववत्, शेषवत्, सामान्यतोदृष्टं चेति। तत्र प्रत्यक्षीकृतजातीयसाघकं पूर्ववत्। यथा - पर्वतो वह्निमान् धूमादिति। केवलव्यतिरेकि परिशेषानुमानं वा शेषवत्। यथा - शब्दः अष्टद्रव्यातिरिक्तद्रव्याश्रितः, अष्टद्रव्यानाक्षितत्वे सति समवायिकारणत्वात्, यन्नैवं तन्नैवं यथा रूपं इति। अप्रत्यक्षीकृतजातीयसाध्यकं अनुमानं सामान्यतोदृष्टम्। यथा - रूपादिज्ञानानि करणवन्ति, क्रियात्वात्, छिदिक्रियावत्

इति इन्द्रियसाधकमनुमानम्।। यथार्थवाक्यजनितं वाक्यार्थज्ञानमेव शब्दप्रमाणम् इति।। ५।।

**सामान्यतस्तु दृष्टात् अतीन्द्रियाणां प्रतीतिरनुमानात्।**

**तस्मादपि चासिद्धं परोक्षमाप्तागमात् सिद्धम्। ६।।**

**अन्वयः**- सामान्यतोदृष्टात् अनुमानत् अतीन्द्रियाणां (पदार्थानां) प्रतीतिः, तस्मात् अपि च असिद्धम् परोक्षं आप्तागमात् सिद्धम् (भवति)।

**भवार्थः**- तत्र व्यक्तं ऐन्द्रियकं प्रत्यक्षत एव सिद्धम्। अतीन्द्रियेषु तत्त्वेषु च केषांचित् प्रतीतिः, सामान्यतोदृष्टादनुमानात्। तस्मादप्यप्रतीतं यत् सृष्टिरहस्य स्वर्गापवर्गौ धर्माधर्मैं देवतारहस्यं चेत्यादि अत्यन्तपरोक्ष तत् सर्वं शब्दप्रमाणादेव सिद्धयति।। ६।।

**अतिदूरात् सामीप्यात् इन्द्रियघातान्मनोऽनवस्थानात्।**

**सौक्ष्म्याद् व्यवधानात् अभिभवात् समानाभिहाराच्च।। ७।।**

**अन्वयः**- अतिदूरात्, सामीप्यात्, इन्द्रियघातात्, मनोऽनवस्थानात्, सौक्ष्म्यात्, व्यवधानात्, अभिभवात्, समानाभिहारात् च (पदार्थेस्य प्रत्यक्षतः अनुपलब्धिः भवतीति शेषः)।

**भावार्थः**- आकाशे उत्पत्तः अत्यूर्घ्वं गतस्य विहगस्येव अतिदूरस्थितत्वात्, लोचनसङ्गताञ्चनादेरिव अतिसमीपस्थितत्वात्, इन्द्रियघातात्, मनसः विषयान्तरप्रवृत्युपहततय प्रसक्तविषयासंस्पर्शात्, परमाण्वादेरिव विषयस्यास्यात्यन्तसूक्ष्मत्वात्, भित्तिजवनिकादिवस्त्वन्तरव्यवधानात् चण्डकिरणप्रमया नक्षत्रादेरिव प्रबलाभिभवात्, नूतनजलघारामिश्रितप्राक्तनजलस्येव सदृशतमवस्तुमिश्रीभावात्, क्षीरे दघ्न इवानभिव्यक्तेश्र्च, लोके सत्यतमनिर्दिष्टवस्तुनःसत्त्वेऽपि उपलब्धिर्न भवतीति प्रसिद्धमेव।। ७।।

**सौक्ष्म्यात्तदनुपलब्धिर्नाऽभावात्, कार्यतस्तदुपल्ध्धेः।**

**महदादि तच्च कार्यं प्राकृतिसरूपं विरूपं च।। ८।।**

**अन्वयः**- कार्यतः तदुपलब्धेः तदनुपलब्धिः सौक्ष्म्यात् (भवति,) अभावात् न (भवति)। तत् कार्ये महदादि च प्रकृतिसरूपं विरूपं च (अस्ति)।

**भावार्थः**- प्रकृते तु-तेषु अतिसूक्ष्मत्वादेव हेतोः प्रधानादीनां अनुपलब्धिः, न तु वस्तुनोऽभावात्। यतः कार्यलिङ्गकानुमानप्रमाणेन तत् सिद्धयति। तञ्च कार्यं महदहङ्कारादि। तञ्च केनचिद्धर्मेण प्रकृतिसरूपम्, केनचिद्धर्मेण प्रकृतिविरूपं च भवति।। ८।।

**असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात्।**

**शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम्।। ९।।**

**अन्वयः**- असदकरणात्, उपादानग्रहणात्, सर्वसम्भवाभावात्, शक्तस्य शक्यकरणात्, कारणभावात् च सत् कार्यम्।

**भावार्थः**- एवं कार्यदर्शनबलात् अस्त्यस्य किञ्चित् कारणमिति यत् गम्यते, तदेव प्रधानम्। यतः कार्योत्पत्तेः प्रागपि

कारणे कार्यमस्त्येवेति कारणात्मकमेवैतत् कार्यम्। तिलेषु तैलस्येव सत एवाभिव्यक्तेः। सर्वथा असत एव वस्तुनः अत्पत्तुमशक्यत्वात्, तदुपादानैः सहैव तत्कार्यस्य सम्बद्धत्वात्, तत्तकार्यं प्रति तत्तत्प्रतिनियतोपादानग्रहणात्, सर्वस्मादपि तद्सम्बद्धसर्वोत्पत्तेरदर्शनात्, तत्कार्यजननशक्तिमत एव शक्यतत्कार्यजनानात्, तन्तुपटवत् प्रागुत्पत्तेरपि कार्यस्य कारणानन्यत्वाच्च, उत्पत्तेः प्रागपि कार्यं कारणे सदेवेत्यबाधम्।। ९।।

**हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम्।**

**सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम्।। १०।।**

**अन्वयः**- व्यक्तम् हेतुमत्, अनित्यम्, अव्यापि, सक्रियम्, अनेकम्, आश्रितम्, लिङ्गम्, सावयवम्, परतन्त्रम्। अव्यक्तम् विपरीतम्।

**भावार्थः**- प्रकृतिपुरुषातिरिक्तं महदादिपृथिव्यन्तत्रयोविंशतितत्त्वात्मकं व्यक्तं हेतुमत्त्वादिधर्मविशिष्टम्, प्रधानप्रकृत्यादिशब्दवाच्यं अव्यक्तं तु उक्तयावद्धर्मशून्यमिति व्यक्ताव्यक्तयोः वैधर्म्यम्। तत्र - स्वाभिव्यक्तिकारणविशिष्टम्, तिरोभावशीलम्, असर्वगतम्, प्रवेशनिःसरणादिपरिस्पन्दवत्, प्रतिपुरुषं च भिन्नभिन्नम्, स्वस्वकारणाश्रितम्, स्वमूलकारणानुमापकम्, संयोगानुयोगिप्रतियोगिभावापन्नम् कार्यान्तरजनने प्रकृत्यापूरसापेक्षं च व्यक्तम्। अव्यक्तं तु अजम्, नित्यम्, सर्वगतम्, निष्क्रियम्, एकम्, कारणावृत्ति, कारणाननु मापकम्, असंयोगि, परानपेक्षं सत् स्वकार्यजनने समर्थं च ।। १०।।

**त्रिगुणमविवेकि विषयः सामान्यमचेतनम्प्रसवधर्मि।**

**व्यक्तं तथा प्रधानां तद्विपरीतस्तथा च पुमान्।।११।।**

**अन्वयः**- अव्यक्तम् त्रिगुणं, अविवेकि, विषयः सामान्यम्, अचेतनं प्रसवधर्मि, प्रधानं, तथा पुमान् तद्विपरीतः तथाच।

**भावार्थः**- उक्तमेतद्वयक्तमव्यक्तं च सुखदुःखमोहरूपत्रिगुणधर्मविशिष्टम्। प्रधानाभिन्नं विविक्ततां विना संमिश्रणपुरःसरकार्यकरणशीलं वा; ग्राहकात् विज्ञानात् भिन्नं, ग्राह्यं बहुपुरुषीयविज्ञानालम्बनीभूतम्; स्वप्रकाशात् चेतनाद् भिन्नम्; नित्यं वस्त्वन्तराविर्भावहेतुश्च भवति। उक्तत्रैगुण्यादिधर्मवैपरीत्यवांश्च पुरुषः। तथाचायं निर्गुणश्च विवेकी - असंहतः, अविषयः, प्रतिसंघातं भिन्नः, चेतनः चितिशक्तेरपरिणामित्वात् अप्रसवधर्मी चेत्यर्थः।। ११।।

**प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः।**

**अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः।। १२।।**

**अन्वयः**- गुणाः प्रीति-अप्रीति-विषादात्मकाः प्रकाश प्रवृत्तिनियमार्थाः अन्योऽन्याभिभवाश्रयजननमिथुनवृत्तयः च।

**भावार्थः**- तत्र - सत्त्वरजस्तमोरूपाः गुणाः क्रमशः सुखदुःखमोहात्मकाः, प्रकाशप्रयत्न - तत्प्रतिबन्धप्रयोजनकाः, परस्पराभिभवरूपक्रियया - परस्पराश्रयेणैव उक्तप्रयोजनोत्पादनक्रियया परस्परसाहाय्येनैव महदाद्युत्पादनक्रियया च विशिष्टाः अन्योन्यमविनाभाववर्तिनश्च।। १२।।

**सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलं च रजः।**

**गुरु वरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः।। १३।।**

**अन्वयः**- सत्त्वम् (एव) लघु प्रकाशकम् च इष्टम्, रजः (एव) उपष्टम्भकं चलम् च तमः (एव) गुरु वरणकम् च, अर्थतः वृत्तिः प्रदीपवत् च।

**भावार्थः**- तत्र - ऊर्ध्वगमनादिहेतुलघुत्वविशिष्टं इन्द्रियार्थसन्निकर्षादावर्थावभासकं च सत्त्वमिति सम्मतम्। रजस्तु-सत्त्वतमसोः स्वस्वकार्यप्रवर्तकं सक्रियं च। तमः - लघुत्वविरोधिस्थितिहेतुभूतगुरुत्वधर्मवत् इन्द्रियव्यापारनिवृत्तिद्वार तत्तत्कार्यप्रतिबन्धकमेव। यथा तैलवर्तिदीपानां परस्परं विरोधे सत्यपि यथावन्मेलनेन प्रकाशजनकत्वं तथैव जीवानामदृष्टवशात्परस्परं यथावन्मेलनेनैतेषां गुणानां उक्तकार्यकारित्वं भवति।। १३।।

**अविवेक्यादेः सिद्धिः त्रैगुण्यात्तद्विपर्ययाभावात्।**

**कारणगुणात्मकत्वात्कार्यस्याव्यक्तमपि सिद्धम्।। १४।।**

**अन्वयः**- त्रैगुण्यात् तद्विपर्ययाभावात् (च) अविवेक्यादेः सिद्धि, कार्यस्य कारणागुणात्मकत्वात् अव्यक्तम् अपि सिद्धम् (अस्ति)।

**भावार्थः**- प्रधानादीनां सुखदुःखमोहधर्मकत्रिगुणस्वरूपत्वादेव हेतोः उक्ताः अविवेकित्वादयो धर्माः सिद्ध्यन्ति। एतद्धर्माभाववति पुरुषे च त्रैगुण्याभावात्। महदादेः कार्यस्य च सुखादिरूपकारणगुणात्मकत्वात् कारणं प्रधानमपि सिद्धं भवति।। १४।।

**भेदानां परिमाणात्समन्वयाच्छक्तितः प्रवृत्तेश्च।**

**कारणकार्यविभागादविभागाद्वैश्वरूप्यस्य।। १५।।**

**कारणमस्त्यव्यक्तम् प्रवर्तते त्रिगुणतः समुदयाच्च।**

**परिणामतः सलिलवत् प्रतिप्रतिगुणाश्रयविशेषात्।। १६।।**

**अन्वयः**- परिमाणात् समन्वयात् शक्तितः प्रवृत्तेः वैश्वरूप्यस्य कारणकार्यविभागात् अविभागात् च भेदनाम् कारणम् अव्यक्तम् अस्ति। (तदव्यक्तम् पुनः) त्रिगुणतः प्रतिप्रतिगुणाश्रयविशेषात् सलिलवत् परिणामतः समुदयात् च प्रवर्तते।

**भावार्थः**- महदादिरूपेण भिन्नानां कार्याणां कारणरूपं प्रधानं अस्ति। कुतः? कार्याणां घटादिवत् परिमितत्वात् अव्यापित्वात्, अध्यवसायादिलक्षणतत्तदसाधारणधर्मवत्वेन मिथोभिन्नानामपि बुद्ध्यादीनां सुखादिरूपसाधारणधर्म वत्तया एकरूपत्वात्, तच्छक्तादेव कारणात् तत्कार्यस्य प्रवृत्तेः, उत्पत्तिकाले सत एव कार्यस्य कारणसकाशादाविर्भावात्, कृत्स्नस्यापि कार्यस्य संहारकाले कारणे एव तिरोभावच्च।। तच्चाव्यक्तं सत्त्वादिगुणत्रयात् परस्परसंमिश्रणाच्च प्रवृत्तं भवति। तत्र च यथा - एकमेव सलिलं नारिकेलजम्बीरादिपरिणाममेदात् मधुरतिक्तादिभावं प्रतिपद्यते, तद्वत् प्रधानमपि एकैकगुणस्य भिन्नभिन्नमात्राणां संमेलनात् नानाविधकार्यरूपतां भजते।। १५-१६।।

**सङ्घातपरार्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानात्।**

**पुरुषोऽस्ति भोक्तृभावात्कैवल्यार्थं प्रवृत्तेश्च।। १७।।**

**अन्वयः**- सङ्घातपरार्थत्वात्, त्रिगुणादिविपर्ययात्, अधिष्ठानात्, भोक्तृभावात्, कैवल्यार्थम् प्रवृत्तेः च पुरुषः

अस्ति।

**भावार्थः**- स्वार्थक्रियायामितरसापेक्षाणां सम्भूयकारिणां स्वातिरिक्तमात्रभोगापवर्गफलकत्वात्, अनवस्थाभयात् क्वचित् सिद्धेन असंहतत्वेन तदाश्रयस्य, संहतत्वव्याप्तत्रैगुण्याविवेकित्वाद्यनाश्रयस्यापि कस्यचित् सत्त्वस्यावश्यकत्वात्, त्रिगुणात्मकानां महदादीनां रथादीनामिव केनचित्परेणावश्यमधिष्ठीयमानत्वात्, सुखाद्यात्मकबुद्ध्यादेः स्वातिरिक्तेन केनचित् भोक्ताऽवश्यमनुभवनीयत्वात्, मुक्तिकृते शिष्टानां प्रवृत्तिदर्शनाञ्च, एतत्सर्वाश्रयः पुरुषः कश्चन आत्मा अस्त्येव ।। १७।।

**जननमरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च।**
**पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव।।१८।।**

**अन्वयः**- जननमरणकरणानाम् प्रतिनियमात् अयुगपत् प्रवृत्तेः च त्रैगुण्यविपर्ययात् च पुरुषबहुत्वम् सिद्धम् एव।

**भावार्थः**- जन्मनो मरणस्य इन्द्रियाणां च व्यवस्थया प्रतिपुरुषं प्रत्येकतयैव दर्शनात्, प्रयत्नभेददर्शनात्, त्रिगुणानां विपर्यासात् सात्त्विकादिभेदेन प्राणिषु वैचित्र्यदर्शनाच्च, एषां आत्मनां बहुत्वमेव सिद्ध्यति।। १८।।

**तस्माच्च विपर्यासात्सिद्धं साक्षित्वमस्य पुरुषस्य।**
**कैवल्यं माध्यस्थ्यं द्रष्टृत्वमकर्तृभावश्च।।१९।।**

**अन्वयः**- तस्मात् विपर्यासात् च अस्य पुरुषस्य साक्षित्वं सिद्धम् (तथैव) द्रष्टृत्वम् कैवल्यम् माध्यस्थ्यम् अकर्तृभावः च (अपि सिद्धम्)।

**भावार्थः**- पूर्वोक्तात् अत्रिगुणत्वाविवेकित्वादेः कारणात्, पुरुषस्यास्य साक्षित्वादिकं सिद्ध्यति। तत्र चेतनत्वात् अविषयत्वाच्च द्रष्टृत्वसाक्षित्वे, सुखदुःखमोहरहितत्वरूपात् अत्रैगुण्याच्च कैवल्यम्, रागाद्वेषरहितत्वरूपमाध्यस्थ्यम्, सम्भूयकारित्वाभावारूप-विवेकित्वात्, अपरिणामितया किञ्चिदजनकत्वरूपा प्रसवधर्मित्वाच्च अकर्तृत्वं च सिद्ध्यति।। १९।।

**तस्मात्तत्संयोगादचेतनं चेतनावदिव लिङ्गम्।**
**गुणकर्तृत्वे च तथा कर्तेव भवात्युदासीनः ।। २०।।**

**अन्वयः**- तस्मात् तत्संयोगात् अचेतनम् लिङ्गम् चेतनावत् इव (प्रतीयते) तथा च गुणकर्तृत्वे (सति) उदासीनः (पुरुषः) कर्ता इव भवति।

**भावार्थः**- चैतन्यं आत्मधर्मः, कृतिमत्त्वं तु बुद्धिधर्मः, इति चैतन्यकर्तृत्वयोः भिन्नाश्रयत्वे युक्तितः सिद्धे, एवं निर्णयो भवति - यतः बुद्धयादिकं लिङ्ग अचेतनमपि चेतनसंनिधानात् चेतनमिवैव भवति, अतः एव च जानामीत्यादिरूपेण परिणातानां गुणानामेव कर्तृत्वेऽपि बुद्ध्युपरागात् बुद्धिप्रतिबिम्बितत्वात् उदासीनोऽप्ययं पुरुषः कर्तेव भवति, तेन च करौमीत्यादि प्रत्ययश्चेति।। २०।।

**पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य।**
**पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः। २१।।**

**अन्वयः**- (पुरुषेण) प्रधानस्य दर्शनार्थम् तथा (प्रधानेन) पुरुषस्य कैवल्यार्थम् पङ्गवन्धवत् अभयोः अपि संयोगः (भवति) तत्कृतः (च) सर्ग (भवति)।

**भावार्थः**- सुखदुःखमोहात्मकं प्रधानं पुरुषकर्तृकतदनुभवरूपभोगार्थं पुरुषमपेक्षते। भोग एव च दर्शनम्। तथा पुरुषः स्वस्य प्रकृतिविविक्तताज्ञानरूपपरिणामजन्यकैवल्यार्थं प्रधानमपेक्ष्ते। एवं च गमनार्थं दर्शनार्थं च पङ्गवन्धयोः परस्परापेक्षेव, पङ्गूपमेन निष्क्रियेण पुरुषेण अन्धोपममचेतनं प्रधानमपेक्ष्यते इति, परस्परापेक्षाकृतः अनयोः संयोगः, तन्निमित्ता सृष्टिश्च भवतीति।। २१।।

**प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद्गणश्च षोडशकः।**
**तस्मादपि षेडशकात्पञ्चभ्यः पञ्चभूतानि ।।२२।।**

**अन्वयः**- प्रकृतेः महान्, ततः अहंकारः, तस्मात् च षेडशकः गणः, तस्मात् षेडषाकात् अपि पञ्चभ्यः पञ्च भूतानि।

**भावार्थः**- प्रधानात् बुद्धिरूपं महत्तत्त्वम, तस्मात् अहमित्यभिमानलक्षणोऽहङ्कारः, तस्मात् एकादशेन्द्रियाणि पञ्च तन्मात्राणीति षोडशको गणः, तत्र च पञ्च तन्मात्रेभ्यः आकाशादीनि पञ्च भूतानि च जायन्ते।। २२।।

**अध्यवसायो बुद्धिर्धर्मो ज्ञानं विराग ऐश्वर्यम्।**
**सात्त्विकमेतद् रूपं तामसमस्माद्विपर्यस्तम्।। २३।।**

**अन्वयः**- अध्यवसायः बुद्धिः धर्मः ज्ञानम् विरागः एश्वर्यम् एतत् (अस्याः) सात्विकम् रूपम् -, अस्मात् विपर्यस्तं तामसम्।

**भावार्थः**- इदं कर्तव्यमिति निश्चयवती बुद्धि। अस्याश्च धर्मादयः चत्वारः सात्त्विकाः धर्माः, अधर्मादयश्चत्वारः तामसाः धर्माः, उमयसहकारिणश्च राजसाः धर्मा। तत्र धर्मः अभ्युदयनिःश्रेयसहेतुः कर्म। ज्ञानं गुणपुरुषान्यताख्यातिरूपम्। वैराग्यं अनासक्तिः, दोषदर्शनात् विषयत्यागेच्छा, भोगानभिषङ्गः, विषयवश्यत्वाभावनिर्णयो वा। ऐश्वर्यं अप्रतिहतेच्छत्वमूलं अणिमाद्यष्टविधम्। अधर्मः नरकादिदुःखहेतुः दुष्टं कर्म। अज्ञानं अनित्याशुचि दुःखानात्मसु नित्यशुचिसुखात्मत्वरूपं विपर्ययज्ञानम्। अवैराग्यं अनन्तविषयभोगतृष्णा। अनैश्चर्य प्रतिहतेच्छत्वमूलं दारिद्र्यम्।। २३।।

**अभिमानोऽहङ्कारः, तस्माद् द्विविधः प्रवर्तते सर्गः।**
**एकादशकश्च गणस्तन्मात्रा - पञ्चकश्चैव।। २४।।**

**अन्वयः**- अभिमानः अहङ्कार, तस्मात् एकादशकः गणः च तन्मात्रापञ्चकः च एव द्विविधः सर्गः प्रवर्तते।

**भावार्थः**- अनहमि अहमस्मीत्यभिमानः अहङ्गरः। तस्मात् द्विप्रकारा सृष्टिर्भवति। एका एकादशोन्द्रियाणाम्, अन्य च पञ्चतन्मात्राणामिति।। २४।।

**सात्त्विक एकादशकः प्रवर्तते वैकृतादहङ्कारात्।**
**भूतादेस्तन्मात्रः स तामसः तैजसादुभयम्।। २५।।**

**अन्वयः**- वैकृतात् अहङ्कारात् सात्त्विकः एकादशकः (गणः) प्रवर्तते, भूतादेः (अहङ्कारात्) तन्मात्रः स तामसः

(गणः प्रवर्तते), तैजसात् (अहङ्कारात्) उभयम् (एव प्रवर्तते)।

**भावार्थः-** प्राथमिकेन्द्रियसर्गानुगुणप्राप्तविकृतिभावात् सात्त्विकादहङ्कारात् प्रकाशकः एकादशेन्द्रियगणः जायते। भूतसर्गप्रागवस्थापन्नात् तामसादहङ्कारत् तमोगुणप्रचुरः जडः पञ्चतन्मात्रगणः जायते। सर्वचालकतया उत्तेजकात् राजसाहङ्कारात् उक्तसृष्टिद्वयसहकारः भवति।। २५।।

**बुद्धीन्द्रियाणि चक्षुः श्रोत्रघ्राणरसनत्वगाख्यानि।**

**वाक्पणिपादपायूपस्थानि कर्मेन्द्रियाण्याहुः।। २६।।**

**अन्वयः-** चक्षुः श्रोत्रघ्राणरसनत्वगाख्यानि बुद्धीन्द्रियाणि, वाक्पाणिपादपायु-उपस्थानि कर्मेन्द्रियाणि आहुः।

**भावार्थः-** इन्द्र = आत्मा, तस्य लिङ्गत्वात् अनुमापकत्वात् इन्द्रियम्। तत्र चक्षुः श्रोत्रघ्राणरसनत्वगाख्यानि पञ्च कर्मसाधनानि इन्द्रियाणि। वाक्पाणिपादपायूपस्थाः पञ्च कर्मसाधनानीन्द्रियाणि।। २६।।

**उभयात्माकमत्र मनः सङ्कल्पकमिन्द्रियं च साधर्म्यात्।**

**गुणपरिणामविशेषान्नानात्वं बाह्यभेदाश्च।। २७।।**

**अन्वयः-** अत्र मनः अभयात्मकम् संकल्पकम् साधर्म्यात् च इन्द्रियम्, बाह्यभेदाः च गुणपरिणामविशेषात् नानात्वम्।

**भावार्थः-** उक्तज्ञानकर्मात्मकोभयेन्द्रियप्रवृत्तिकल्पकत्वात् ज्ञानकर्मोभयात्मकं मनः सात्त्विकाहङ्क-ारोपादानकत्वरूपसमानधर्मेण इन्द्रियमित्येवोच्यते। धर्माधर्मसहकृतगुणविमर्दवैचित्र्यनिमित्ताहाङ्कारवैचित्र्यात् एषु ग्राहकेषु इन्द्रियेषु नानात्वं भवति, एवं इन्द्रियापेक्षया बाह्यानां शब्दतन्मात्रादिरूपाणां ग्राह्याणां च भेदाः भवन्ति।। २७।।

**रूपादिषु पञ्चानामालोचनमात्रमिष्यते वृत्तिः।**

**वचनादानविहरणोत्सर्गानन्दाश्च पञ्चानाम्।। २८।।**

**अन्वयः-** रूपादिषु अलोचनमात्रम् पञ्चानाम् (ज्ञानेन्द्रियाणाम्) वृत्तिः इष्यते। वचनादानविहरणोत्सर्गानन्दाः च पञ्चनाम् (कर्मेन्द्रियाणां वृत्तिः इष्यते)।

**भावार्थः-** रूपादिविषयेषु सन्निहितेषु यत् विषयाकारपरिणामरूपं आलोचनामात्रं तत् पञ्चानामपि ज्ञानेन्द्रियाणां वृत्तिः व्यापारः। वचनाऽऽदानविहरणोत्सर्गाऽऽनन्दास्तु पञ्चनां कर्मेन्द्रियाणां वृत्तयः व्यापाराः।। २८।।

**स्वालक्षण्यं वृत्तिस्त्रयस्य सैषा भवत्यसामान्या।**

**सामान्य करणं वृत्तिः प्राणाद्याः वायवः पञ्च।। २९।।**

**अन्वयः-** त्रयस्य स्वालक्षण्यं वृत्तिः सा एषा असामान्य भवति, सामान्यकरणवृत्तिः प्राणाद्याः पञ्च वायवः सन्ति।

**भावार्थः-** बुद्ध्यहङ्कारमनोरूपान्तःकरणत्रयस्य तत्तदीयलक्षणान्येव तत्तदीयव्यापाराः। यथा बुद्धेः अध्यवसायो व्यापारः, अहङ्कारस्य अभिमानो व्यापारः, मनसः सङ्कल्प एव व्यापार इति। स एष व्यापारः तत्तदसाधारणः। प्राणादयः पञ्च वायवस्तु - शारीरधारणरूपः जीवनाख्यः प्राणनादिव्यापारस्तु मिलितानां त्रयाणामपि करणानां साधारणः व्यापारः।। २९।।

**युगपच्चतुष्टयस्य तु वृत्तिः क्रमशश्च तस्य निर्दिष्टा।**

**दृष्टे तथाप्यदृष्टे त्रयस्य तत्पूर्विका वृत्तिः।। ३०।।**

**अन्वयः**- दृष्टे तस्य चतुष्टयस्य वृत्तिः तु युगपत् क्रमशः निर्दिष्टा। तथा अदृष्टे अपि त्रयस्य वृत्तिः तत्पूर्विका (निर्दिष्टा)।

**भावार्थः**- चक्षुरादिबहिरिन्द्रियसहितस्यान्तःकरणत्रयस्य व्यापाराः आलोचनसङ्कल्प-अभिमान-अध्यवसायाः प्रस्यक्षस्थले क्वचित् युगपदेव प्रादुर्भवन्ति, क्वचिच्च क्रमशः। अनुमानादिपरोक्षस्थले तु बाह्येन्द्रिवृत्तेरसंभवात् केवलं मनोऽहङ्कारबुद्धिरूपान्त- करणत्रयस्य व्यापाराः सङ्कल्पाभिमानाध्यवसाया अपि पूर्ववदेव क्वचिद्युगपत् क्वचिच्च क्रमशः एव प्रादुर्भवन्ति।। ३०।।

**स्वां स्वां प्रतिपद्यन्ते परस्पराकूतहेतुकां वृत्तिम्।**

**पुरुषार्थ एव हेतुर्न केनचित्कार्यते करणम्।। ३१।।**

**अन्वयः**- (करणानि) स्वां स्वां परस्पराकूतहेतुकां वृर्तिं प्रतिपद्यन्ते। (अत्र) पुरुषार्थ एव हेतुः, करणम् केनचित् न कार्यते।

**भावार्थः**- सर्वाण्यपीमानि करणानि परस्पराभिप्रायनिमित्तां आत्मीयामात्मीयामेव - वृत्तिक्रियां प्राप्नुवन्ति। एषां प्रवृत्तौ च पुरुषस्यादृष्टमेव कारणम्। तथाच 'इन्द्रियाणीमानि केनचिच्चेतनेन अधिष्ठात्रा परिचालितानि स्वां स्वां क्रियां कुर्वन्ति' इति न भ्रमितव्यम्।। ३१।।

**करणां त्रयोदशविधं तदाहरणधारणप्रकाशकरम्।**

**कार्यं च तस्य दशधाऽऽहार्यं धार्यं प्रकाश्यं च।। ३२।।**

**अन्वयः**- करणां त्रयोदशविधम्, तत् आहरणधारणप्रकाशकरम्, तस्य च अहार्यं धार्यं प्रकाश्यं च कार्यं दशधा (भवति)।

**भावार्थः**- एकादशेन्द्रियाणि बुद्धिरहङ्कारश्चेत करणं त्रयोदशविधम्। तत्र वागादिपञ्चकर्मेन्द्रियाणि वागादिव्यापारेण वचनादीनि कर्माण्याहरन्ति प्राप्नुवन्ति। बुद्ध्यहङ्कारमनांसि प्राणादिव्यापारेण देहं धारयन्ति। पञ्च ज्ञानेन्द्रियाणि प्रकाशरूपेण व्यापारेण शब्दस्पर्शादीन् प्रकाशयन्ति। तस्य च त्रयोदशविधकरणस्य कार्यतया अभिमतं आहार्यं धार्यं प्रकाश्यं च प्रत्येकं दशप्रकारम्, पञ्चकर्मणां पञ्चप्राणानां पञ्चज्ञानानां च दिव्यादिव्यभेदेन द्वैविध्यात्।। ३२।।

**अन्तः करणां त्रिविधं दशधा बाह्यं त्रयस्य विषयाख्यम्।**

**साम्प्रतकालं बाह्यं त्रिकालमाभ्यन्तरं करणम् ।।३३।।**

**अन्वयंः**- अन्तःकरणं त्रिविधम्, त्रयस्य विषयाख्यं बाह्यं दशधा बाह्यं (करणं) साम्प्रतकालम्, आभ्यन्तरं करणं त्रिकालम्।

**भावार्थः**- तत्र मनोबुद्ध्यहङ्कारभेदात् अन्तःकरणं त्रिविधम्। बाह्यकरणं तु पञ्चज्ञानेन्द्रियपञ्चकर्मेन्द्रियभेदात दशविधम। तच्च बाह्यं मनाद्यन्तःकरणैः विषयगोचरेषु सङ्कल्पादिषु कर्तव्येषु व्यापारजनकं सत् द्वारीभवति। तत्र च

बाह्येन्द्रियाणि वर्तमानमात्रविषयकाणि। आन्तराणि अतीतानागतवर्तमानात्मकत्रिकालविषयकाणि।३३।।

**बुद्धीन्द्रियाणि तेषां पञ्च विशेषाविशेषविषयाणि।**

**वाग्भवति शब्दविषया शेषाणि तु पञ्चविषयाणि।। ३४।।**

**अन्वयः**- तेषां पञ्च बुद्धीन्द्रियाणि विशेषाविशेषविषयाणि, वाक् शब्दविषया भवति, शेषाणि तु पञ्चविषयाणि।

**भावार्थः**- तेषु पञ्चज्ञानेन्द्रियाणि पृथिव्यादिमहाभूतात्मकस्थूलशब्ददिरूपाणां विषयाणामं, तथा तद्रूपेणापरिणतानां सूक्ष्मशब्दादिरूपाणां तन्मात्राणां च विषयाणां ग्राहकाणि। कर्मेन्द्रियेषु प्रथमा वाक् स्थूलशब्दमात्रजननी। शेषाणि चत्वारि शब्दादिपञ्चविषयकाण्येव। यतः - हस्तादीनि यैः घटादिभिः सम्बद्धानि भवन्ति, तानि सर्वाण्यपि वस्तूनि शब्दस्पर्शरूपरसगन्धतन्मात्रेभ्यः परिणतानि तदात्मकान्येव भवन्तीति।। ३४।।

**सान्तःकरणा बुद्धिः सर्वं विषयमवगाहते यस्मात्।**

**तस्मात् त्रिविधं करणं द्वारि द्वाराणि शेषाणि।। ३५।।**

**अन्वयः**- यस्मात् सान्तःकरणा बुद्धिः सर्वं विषयं अवगाहते तस्मात् त्रिविधं करणं द्वारिशेषाणि द्वाराणि।

**भावार्थः**- अहङ्कारमनस्सहिता बुद्धिः यतः अन्यैः दशभिरपीन्द्रियैरुपनीतं सर्वं विषयजातं अवगाहते - विषयीकरोति, अत एव तत् त्रिविधमपि करणं प्रधानम्, शेषाणि दश बाह्यकरणानि अप्रधानानि भवन्ति।। ३५।।

**एते प्रदीपकल्पाः परस्परविलक्षणाः गुणविशेषाः।**

**कृत्स्नं पुरुषस्यार्थं प्रकाश्य बुद्धौ प्रयच्छन्ति।। ३६।।**

**अन्वयः**- प्रदीपकल्पाः परस्परविलक्षणाः एतेगुणविशेषाः पुरुषस्य कृत्स्नं अर्थं प्रकाश्य बुद्धौ प्रयच्छति।

**भावार्थः**- सत्त्वादिगुणानां विकारभूताः एते बाह्येन्द्रियमनोऽहङ्काराः सर्वेऽपि मिथो विलक्षणाः विरोधशीलाः सन्तोऽपि, सन्तमसापनयनेन रूपप्रकाशनाय प्रदीपे मिलिताः वर्ति-तैल-वह्नयः इव परस्परं मिलिताः सन्तः, पुरुषस्यार्थे स्वस्वविषयानुसारं निखिलमर्थं प्रकाशितं कृत्वा सर्वाध्यक्षभूतायां बुद्धावेव स्थापयन्तीति, तेष्वपि एषा बुद्धिरेव प्रधानम्।। ३६।।

**सर्वं प्रत्युपभोगं यस्मात्पुरुषस्य साधयति बुद्धिः।**

**सैव च विशिनष्टि पुनः प्रधानपुरुषान्तरं सूक्ष्मम्।। ३७।।**

**अन्वयः**- यस्मात् पुरुषस्य सर्वे (विषयं) प्रति (जायमानम्) उपभोगम् बुद्धिः साधयति सा एव च पुनः सूक्ष्मम् प्रधानपुरुषान्तरम् विशिनष्टि (तस्मात् सर्वाणि करणनि विषयम् प्रकाश्य बुद्धौ प्रयच्छन्ति।

**भावार्थः**- बुद्धिर्हि पुरुषसन्निधानात् पुरुषाभिन्नत्वेनैव प्रतीयमाना विवेकाग्रहात् स्वकृतभोगेनैव 'अहं सुखी' ति पुरुषप्रत्ययजनकः सन् परुषस्यास्य सर्वमपि विषयोपभोगं साधयति। सैव च बुद्धिः पुनः कालक्रमेण सूक्ष्मं दुर्लक्ष्यं प्रधानपुरुषयोरन्तरं विवेकं च करोतीतिअन्तः करणेष्वप्येषा बुद्धिरेव प्रधानम्, नत्वितराणि।। ३७।।

**तन्मात्राण्यविशेषाः तेभ्यो भूताति पञ्च पञ्चभ्यः।**

**एते स्मृता विशेषाः ज्ञान्ता घोराश्च मूढाश्च।। ३८।।**

**अन्वयः**- तन्मात्राणि अविशेषाः, तेभ्यः पञ्चभ्यः पञ्च भूतानि (जायन्ते), एते शान्ताः घोराः च मुढाः च विशेषाः स्मृताः।

**भावार्थः**- सूक्ष्मशब्दादीनि पञ्चतन्मात्राणि उपभोगयोग्यशान्तत्वादिधर्मविशेषरहिततया अविशेषाभिधानानि। तेभ्यश्च आकाशादिपदवाच्याः महाभूतविशेषाः जायन्ते। एते च विशेषाभिधानाः। यतः - तेषु केचित् शान्ताः केचित् घोराः, केचित् मूढाश्च। तत्र-सत्त्वप्रधानाः सुखावहाः शान्ताः- वीणामन्दमारुत - सुन्दरी पुण्ड्रेक्षु- कर्पूरादिसम्बन्धिनः शब्दस्पर्शरूपरसगन्धाः। रजः प्रधानाः दुःखावहाः धोराः व्यघ्रा - अग्रि - विद्युत् - सर्षप - चम्पकादिसम्बन्धिनः शब्दादयः। तमःप्रधानाः मोहावहाः मूढाः - मेघ - विष-तिक्त-निम्बपत्र लशुनाद्यनुबन्धिनः शब्दादयः इति। ३८।।

**सूक्ष्मा मातापितृजाः सह प्रभूतैस्त्रिधा विशेषाः स्युः।**

**सूक्ष्मास्तेषां नियताः मातापितृजाः निवर्तन्ते ।। ३९।।**

**अन्वयः**- (एते) विशेषाः सूक्ष्माः मातापितृजाः प्रभूतैः सह त्रिधा स्युः। तेषाम् सूक्ष्माः नियताः, मातापितृजाः निवर्तन्ते।

**भावार्थः**- तेष्वपि विशेषेषु एते अवान्तरविशेषाः। यथा - प्रकृतित एवोत्पन्नेषु चतुर्विंशतितत्त्वेषु तत्त्वानां परस्परं मेलनेन त्रिधा विशेषवस्तून्युत्पद्यन्ते सूक्ष्मशरीरम्, स्थूलशरीरम्, महाभूतानीति। यैः पुरुषस्योपभोगः सुसिद्धो भवेत्। तत्र अष्टादशतत्त्वैरेव संगृहीतं सूक्ष्मं शरीरं नियतं नित्यं आमोक्षावस्थायि। मातापितृभ्यां उत्पन्नं स्थूलं शरीरं मरणकालपर्यन्तावस्थायि। महाभूतानि च आप्रलयावस्थायीनि भवन्ति।। ३९।।

**पूर्वोत्पन्नमसक्तं नियतं महदादिसूक्ष्मपर्यन्तम्।**

**संसरति निरुपभोगं भावैरधिवासितं लिङ्गम्।। ४०।।**

**अन्वयः**- पूर्वोत्पन्नम् असक्तम् नियतं महादादिसूक्ष्म-पर्यन्तम् निरुपभोगं भावैः अघिवासितम् लिङ्गम् संसरति।

**भावार्थः**- पूर्वं आदिसर्गे प्रधानेन प्रतिपुरुषं पृथक्पृथक् उत्पादितं लिङ्गं सूक्ष्मशरीरं असक्तं अव्याहतं शिलायामपि प्रवेशनार्हम् आमोक्षावस्थयि च। एवं महदहङ्कारमनोदशेन्द्रियपञ्चतन्मात्ररूपाष्टादशतत्त्वसमूहरूपं स्वतः स्थूलदेहं विना उपभोगासमर्थम्, धर्माधर्म-ज्ञानाज्ञान-वैराग्यावैराग्य-ऐश्वर्यानैश्वर्यरूपाणां अष्टभावानां वासनया युक्तं सत् संसरति - पूर्वपूर्वं स्थूलशरीरं परित्यज्य नवं नवं स्थूलशरीरं धारयितुं प्रभवति।। ४०।।

**चित्रं यथाऽऽश्रयमृते स्थाण्वादिभ्यो विना यथाच्छाया।**

**तद्वद्विना विशेषैर्न तिष्ठति निराश्रयं लिङ्गम्।। ४१।।**

**अन्वयः**- यथा आश्रयम् ऋते चित्रम्, यथा स्थाण्वादिभ्यः विना छाया (च) न तिष्ठति तद्वत् विशेषैः विना निराश्रयम् लिङ्गम् न तिष्ठति।

**भावार्थः**- यथा पटभित्त्यादिकेः आश्रयैर्विना चित्रं वा, स्थाण्वादिभिः प्रतियोगिभिर्विना तच्छाया वा न तिष्ठति, तद्वदेव विशेषधर्मविरहितैः सूक्ष्मैः शरिरैर्विना निराश्रयं बुद्ध्यादिकं लिङ्गं न तिष्ठतीति तदाधारं सूक्ष्मशरीरं आवश्यकमेव।। ४१।।

**पुरुषार्थहेतुकमिदं निमित्तनैमित्तिकप्रसङ्गेन।**

**प्रकृतेर्विभुत्वयोगान्नटवद् व्यवतिष्ठते लिङ्गम्।। ४२।।**

**अन्वयः**- इदं पुरुषार्थहेतुकं लिङ्गं निमित्तनैमित्तिकप्रसङ्गेन प्रकतेः विभुत्वयोगात् नटवत् व्यवतिष्ठते।

**भावार्थः**- भोगापवर्गलक्षणपुरुषर्थोद्देशेन प्रवर्तितं इदं च सूक्ष्मशरीरं धर्मादिनिमित्तसंबन्धेन स्थूलदेहादिनैमित्तिकसम्बन्धेन च अद्भुतेन प्रकृतिमहिम्ना नटवत् व्यवतिष्ठते - नटो यथा रङ्गे विविधामाश्चर्यमयीं वेशरचनां परिगृह्य व्यवहरति, तत्तच्छरीरं च अहंत्वेनाभिमन्यते, तथा।। ४२।।

**सांसिद्धिकाश्च भावाः प्राकृतिका वैकृताश्च धर्माद्याः।**

**दृष्टाः करणाश्रयिणः कार्याश्रयिणश्च कललाद्या।। ४३।।**

**अन्वयः**- प्राकृतिकाः सांसिद्धिकाः (च) वैकृताः च धर्माद्याः भावाः करणाश्रयिणः दृष्टाः। कललाद्याः (भावाः) कार्याश्रयिणः (वर्तन्ते)।

**भावार्थः**- निमत्तरूपाः धर्माद्याः अष्टो भावाः करणरूपबुद्धयाश्रिताः सांसृतिमूलभूताः भवन्ति। एते च भावाः संसिद्धिकाः असांसिद्धिकाः इति द्विविधाः। तत्र सांसिद्धिकाः स्वभावसिद्धाः प्राकृतिकाः इत्युच्यन्ते। असांसिद्धिकाः पुरुषप्रयत्नसाध्याः वैकृतिकाः इत्युच्यन्ते। तत्र भगवतः कपिलादेः धर्मज्ञानवैराग्यैश्वर्यरूपभावाः सांसिद्धिकाः। प्राचेतसादेस्तु तप आदिनिमित्तजन्याः वैकृतिकाः। एवं अधर्मादयोऽपि केषांचित् सांसिद्धिकाः केषांचित् दुरभ्यासादिजन्याः।। एवं नैमित्तिकरूपाः शरीररूपकार्याश्रयिणः गर्भनिष्ठाः कलल-बुद्बुद-मांस-पेशी करण्ड-अङ्ग-प्रत्यङ्गव्यूहाः, गर्मविनिर्गतदेहनिष्ठाः बाल्य - कौमार - यौवन वार्धक्यावस्थाश्र्च उक्तप्रकारेणैव द्विविधाः।। ४३।।

**धर्मेण गमनमूर्ध्व गमनमधस्ताद्भवत्यधर्मेण।**

**ज्ञानेन चापवर्गो विपर्ययादिष्यते बन्धः।।४४।।**

**अन्वयः**- धर्मेण ऊर्ध्व गमनं भवति, अधर्मेण अधस्तात् गमनम् (भवति), ज्ञानेन अपवर्गः इष्यते, विपर्ययात् बन्धः (इष्यते)।

**भावार्थः**- धर्मेण द्युप्रभृत्यूर्ध्वलोकगमनम् - अघर्मेण च नरकाद्यधौलोकगमनम्, ज्ञानेन विविक्तात्मसाक्षात्कारपूर्वकं भवबन्धविमोचनरूपो मोक्षः, अज्ञानात् बन्धश्च भवति।। ४४।।

**वैराग्यात् प्रकृतिलयः संसारो भवति राजसाद्रागात्।**

**ऐश्वर्यादिविघातो विपर्ययात्तद्विपर्यासः।। ४५।।**

**अन्वयः**- वैराग्यत् प्रकृतिलयः भवति, राजसात् रागात् संसारः (भवति), ऐश्वर्यात् (भवति), विपर्ययात् तद्विपर्यासः (च भवति)

**भावार्थः**- येषां आत्मज्ञानं न जातम्, ततः प्रागेव च इहपरसुखेषु वितृष्णा च जाता, तेषां तादृशात् वैराग्यात् प्रकृतौ तत्कार्येषु महदादिषु वा लयः भवति। रजः कार्यत् कर्मफलाभिलाषात् तादृशकर्मफलभोगानुगुणः संसारः स्थूलशरीरपरिग्रहः जायते।

अणिमाद्यैश्वर्यात् अप्रतिबन्धेन सर्वामप्यात्मन इच्छां पूरयितुं समर्थो भवति। अनैश्वर्याच्च सर्वत्र इच्छायाः विघातः एव भवति।। ४५।।

**एष प्रप्तयसर्गो विपर्ययाशक्तितुष्टिसिद्ध्याख्यः।**

**गुणवैषम्यविमर्दात् तस्य च भेदास्तु पञ्चाशत्।। ४६।।**

**अन्वयः**- विपर्ययाशक्तितुष्टिसिद्ध्याख्यः एष प्रत्ययसर्गः। तस्य च गुणावैषम्यविमर्दात् भेदास्तु पञ्चाशत् भवन्ति।

**भावार्थः**- विपर्ययशक्तितुष्टिसिद्धयश्च बुद्धिसृष्टाः बुद्धिरूपा एव। तत्र-विपर्ययः अज्ञानम्। अशक्तिः पदार्थनिश्चयजनने क्रियाजनने च सामर्थ्याभावः अनैश्वर्यावैराग्यधर्मरूपः। तुष्टिः धर्मवैराग्यैश्वर्यरूपा। सिद्धिः ज्ञानम्। गुणानां न्यूनाधिकबलतया परस्परमभिभवात् तस्यैवास्य विपर्ययादिरूपस्य बुद्धिसर्गस्य पञ्चाशद्भेदाश्च भवन्ति।। ४६।।

**पञ्चविपर्ययभेदा भवन्त्यशक्तिश्च करणावैल्यात्।**

**अष्टाविंशतिभेदा तुष्टिर्नवधाऽष्टधासिद्धिः।। ४७।।**

**अन्वयः**- विपर्ययभेदाः पञ्च भवन्ति, करणवैकल्यात् अशक्तिः च अष्टविंशतिधा (भवति) तुष्टिः नवधा (भवति), सिद्धिः अष्टधा (भवति)।

**भावार्थः**- ते च पञ्चाशभ्देदाः इत्थं - विपर्ययभेदाः पञ्च (५) करणानामपाटवनिमित्तात् अशक्तिः अष्टविंशतिधा (२८) तुष्टिः नवघा (९) सिद्धिश्चाष्टधा (८) इति।। ४८।।

**भेदस्तमसोऽष्टविधो मोहस्य च, दशविधो महामोहः।**

**तामिस्रोऽष्टादशधा तथा भवन्त्यन्धतामिस्रः।। ४८।।**

**अन्वयः**- तमसः मोहस्य च अष्टविधः भेदः (अस्ति), दशविधः, महामोहः (भवति) तामिस्रः अष्टादशघा (अस्ति) तथा (अर्थात् अष्टादशघा) अन्धतामिस्त्रः भवति।

**भावार्थः**- तत्र - तमः, मोहः, महामोहः, तामिस्रः, अन्धतामिस्रः इति विपर्ययभेदाः पञ्च। तत्र अव्यक्ताद्यष्टसु आत्मताबुद्धिः तमः अष्टधा। अष्टैश्वर्येषु मोहः अष्टधा। दिव्यादिव्येषु शब्ददिपञ्चविषयेषु रागः महामोहः दशघा। दिव्यादिव्यभेदेन द्विविधेषु शब्दादिपञ्चविषयेषु तत्साधनेषु अणिमाद्यष्टैश्वर्येषु च अन्यतमास्वादनवेलायां, आपततः तदितरस्य एतद्रसानुभवविघात- कतया द्वेषविषयत्वमेव भवतीति। एतादृशो द्वेषः तामिस्रः, एवंरूपः अभिनिवेशः अन्धतामिस्रश्च अष्टादशधा।। ४८।।

**एकादशेन्द्रियवधाः सह बुद्धिवधैरशक्तिरुद्दिष्टा।**

**सत्पदश वधाः बुद्धेर्विपर्ययात्तुष्टिसिद्धीनाम्।। ४९)**

**अन्वयः**- बुद्धिवधैः सह एकादशेन्द्रियवधाः अशक्तिः उद्धिष्टा तुष्टिसिद्धीनाम् विपर्ययात् बुद्धेः वघाः सप्तदश (भवन्ति)।

मनसा सह दशानामपीन्द्रियाणां सौन्दर्यनाशकाः दोषाः एकादश (११)। वक्ष्यमाणानां नवविधतुष्टीनां अष्टविघसिद्धीनां

च विपर्ययात् वैकल्यात् बुद्धेर्दोषाः सप्तदश (१७)। आहत्य अष्टविंशतिर्भेदाः अशक्तेः ।।४९।।

**आध्यात्मिक्याश्चतस्त्रः, प्रकृत्युपादानकालभाग्याख्याः।**

**बाह्या विषयोपरमात् पञ्च च नव तुष्टयोऽभिमताः।। ५०**

**अन्वयः**- प्रकृत्युपादानकालभाग्याख्याः चतस्रः अध्यात्मिक्यः विषयोपरमात् च पञ्च बाह्या (इति) नव तुष्टयः अभिमताः।

**भावार्थः**- यः खलु प्रकृतिविविक्तात्मास्तित्वोपदेशश्रवणमात्रेण कृतकृत्यताभिमानि विविक्तात्मसाक्षात्काराय नैवप्रतयते, तस्य काचन तुष्टिर्भवति किल, सैव आध्यात्मिकी तुष्टिः यश्च आत्मव्यतिरिक्तानेव प्रकृत्यादीन् आत्मत्वे नाभिमन्यते, तस्यामेवावस्थायां बाह्यविषयेषु वैराग्यं च भवति चेत्, तस्य काचन तुष्टिर्भवति, सैव बाह्या तुष्टिः। तत्राद्या चतुर्विधाः प्रकृतितुष्टिः उपादानतुष्टिः कालतुष्टिः, भाग्यतुष्टिः इति। द्वितीया तु पञ्चविधा - पारतुष्टिः, सुपारतुष्टिः, परापरतुष्टिः, अनुत्तमाम्भस्तुष्टिः, उत्तमाम्भस्तुष्टिःइति ५०।।

**ऊहः शब्दोऽध्ययनं दुःखविघातास्त्रयः सुहृत्प्राप्तिः।**

**दानं च सिद्धयोऽष्टौ सिद्धेः पूर्वाऽङ्कुशस्त्रिविधः।। ५१।।**

**अन्वयः**- ऊहः, शब्दः, अध्ययनम, त्रयः दुःखविघाताः सुहृत्त्राप्तिः दानम् च (इति) अष्टौ सिद्धयः (सन्ति), पूर्वः (विपर्ययाशक्तितुष्टसंज्ञकः) त्रिविधः सिद्धेः अङ्कुशः (अस्ति)।

**भावार्थः**- ऊहः जन्मान्तरसंस्कारेण तात्त्विकार्थानां तर्कणं, शब्दः परैः पठ्यमानात् शब्दादेवार्थज्ञानम्, अध्ययनं गुरुमुखात् शास्त्रार्थग्रहणम्, आध्यात्मिकादिदुःखत्रयनाशः सुहृत्प्राप्तिः तत्त्वज्ञमित्रमिलनम्, दानं ज्ञातार्थसंशोधनेन बुद्धेः स्वच्छप्रवहेऽवस्थापनं सर्वार्पणेन ज्ञानप्राप्तिर्वा इति अष्टौ सिद्धयः। तत्र पूर्वोक्तविपर्ययाशक्तितुष्टिरूपस्त्रिविधोऽपि सिद्धेः धातुकः।। ५१।।

**न विना भावैलिङ्गं न विना लिङ्गेन भावनिर्वृत्तिः।**

**लिङ्गाख्यो भावाख्यस्तस्माद् द्विविधः प्रवर्तते सर्गः ।।५२।।**

**अन्वयः**- लिङ्गम् भावैः विना न (भवति), भावनिर्वृत्तिः लिङ्गेन विना न (भवति), तस्मात् लिङ्गख्यः भावाख्यः द्विविधः सर्गः प्रवर्तते।

**भावार्थः**- पुरुषर्थभोगरूपं भोगं प्रति भोग्य - भोगाधिकरण भोगसाधनानीति त्रयमप्यपेक्षितं खलु। तत्र - शब्दादिकं - भोग्यम्, भोगाधिकरणम् - शरीरं स्थूलसूक्ष्मरूपेण द्विविधमपि, भोगसाघनानि च बाह्यान्तरकरणानि। भोग्यभोगाधिकरणयोः सम्पादनाय तन्मात्रकृतसर्गः सूक्ष्मशरीर-शब्ददिमहाभूत-स्थुलशरीरादिरूपः। भोगसाधनसम्पादनाय प्रत्ययसर्गः धर्माद्यष्टभेदेन पञ्चाशद्भेदेन वा भिन्नः। तन्मात्रकृतसर्ग एव लिङ्गसृष्टिः प्रत्ययसर्ग एव भावसृष्टिः। तत्र भावसर्गैर्विना लिङ्गसर्गे न भवति, उत्तरोत्तरदेहादिलाभस्य पूर्वपुर्वसंस्कारादृष्टकारित्वात्। लिङ्गसर्गेण विना भावसर्गो न भवति, धर्मादेः स्थुलसूक्ष्मदेहसाध्यत्वात्। तस्मात् लिङ्गख्यो भावाख्यश्चेति द्विविधोऽपि सर्गः बुद्धितत्वात् प्रवर्तते।। ५२।।

**अष्टविकल्पो दैवस्तैर्यग्योनश्च पञ्चधा भवति।**

**मानुषकश्चैकविधः समासतो भौतिकः सर्ग।।५३।।**

**अन्वयः**- देवः अष्टविकल्पः, तैर्यग्योन; पञ्चधा, मानुषकः ; एकविधः भवति (इति) समासतः भौतिकः सर्गः (अस्ति)।

**भावार्थः**- देवयोनौ भवः सर्गः - ब्राह्मः प्राजापत्यः ऐन्द्रः पैत्रः गान्धर्वः याक्षो राक्षसः पैशाचः इत्यष्टविधः। तिर्यग्योनौ भवः- पशुः, मुगः, पक्षी, सरीसृपः, स्थावरः, इति पञ्चविधः। मानुषस्तु एकविधः एव। एव चतुर्दशविधः भौतिकः भूतादिरूपतन्मात्रकृत. सर्गः।। ५३।।

**ऊर्ध्वं सत्त्वविशालस्तमोविशालश्च मूलतः सर्गः।**

**मध्ये रजोविशालो ब्रह्मादिस्तम्बपर्यन्तः।। ५४।।**

**अन्वयः**- सत्त्वविशालः सर्गः उर्ध्वम्, तमोविशालः च मूलतः, रजोविशालः मध्ये (अस्ति), (इति) ब्रह्मादिस्तम्बपर्यन्तः (सर्गः)।

**भावार्थः**- तत्र ऊर्ध्वलोकानुबन्धी दैवसर्गः सत्त्वप्रचुरः। मूलरूपाधोलोकानुबन्धी तैर्यग्योनसर्गः तमोबहुलः। मध्यलोकानुबन्धी मनुष्यसर्गस्तु रजोबहुलः। एवं ब्राह्मादिस्तम्बपर्यन्तः सर्वो लोकः गुणत्रयव्याप्तः एव।। ५४।।

**तत्र जरामरणकृतं दुःखं प्राप्नोति चेतनः पुरुषः।**

**लिङ्गस्याविनिवृत्तेस्तस्माद् दुःखं स्वभावेन।।५५।।**

**अन्वयः**- तत्र चेनतः पुरुषः लिङ्गस्य अविनिवृत्तेः जरामरणकृतं दुःखं प्राप्नोति, तस्मात् स्वभावेन दुःखम् (अस्ति)।।

**भावार्थः**- तत्र देहेन्द्रियादौ चैतन्यवान् पुरुषः जरामरणदिकृतं दुःखं स्वकीयसूक्ष्मशरीरनिवृत्तिपर्यन्तं स्वभावतः एव प्राप्रोति। तस्मात् सर्गः स्वतः एव दुःखरूपो विवेकिनाम्।। ५५।।

**इत्येष प्रकृतिकृतो महदादिविशेषभूतपर्यन्तः।**

**प्रतिपुरुषविमोक्षार्थं स्वार्थं इव परार्थं आरम्भः।।५६।।**

**अन्वयः**- इति एषः महदादिविशेषभूतपर्यन्तः प्रकृतिकृतः आरम्भः प्रतिपुरुषविमोक्षार्थम् स्वार्थः इव परार्थः (अस्ति)।

**भावार्थः**- इत्येषः महत्तत्वप्रभृति स्थूलभूतर्यन्तः सर्गः प्रकृत्यैव कृतः। स च सर्गः परार्थः एकेकपुरुषविमोचनार्थः। परार्थमपीमं स्वार्थमिव मन्यमानेयं प्रकृतिः एवं सृष्टि करोति।। ५६।।

**वत्सविवृद्धिनिमित्तंक्षीरस्य यथा प्रवृत्तिरज्ञस्य।**

**पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य।। ५७।।**

**अन्वयः**- यथा वत्सविवृद्धिनिमित्तम् अज्ञस्य क्षीरस्य प्रवृत्तिः (भवति) तथा पुरुषविमोक्षनिमित्तम् प्रधानस्य प्रवृत्तिः (भवति)।

**भावार्थः**- यथा अचेतनस्यापि क्षीरस्य वत्सपोषणकृते स्वयमेव प्रस्तावः, एवं अचेतनस्यापि प्रधानस्य स्वस्मात् पुरुषविमोक्षणकृते एव प्रवृत्तिरुपपद्यते।। ५७।।

**औत्सुक्यनिवृत्त्यर्थं यथा क्रियासु प्रवर्तते लोकः।**
**पुरुषस्य विमोक्षार्थं प्रवर्तते तद्वदव्यक्तम्।। ५८।।**

**अन्वयः**- यथा औत्सुक्यनिवृत्त्यर्थम् लोकः क्रियासु प्रवर्तते तद्वत् पुरुषस्य विमोक्षार्थम् अव्यक्तम् प्रवर्तते।

**भावार्थः**- यथा खलु जनः इष्यमाणप्राप्त्या इच्छानिवृत्त्यर्थं तदनुगुणकर्मसु प्रवर्तते, तथैव पुरुषस्य विमोक्षार्थं प्रकृतिः प्रवर्तते। पुरुषमोक्ष एव प्रकृतेः स्वार्थतुल्यः इष्यमाणः इति।। ५८।।

**रङ्गस्य दर्शययित्वा निवर्तते नर्तकी यथा नृत्यात्।**
**पुरुषस्य तथाऽऽत्मानं प्रकाश्य विनिवर्तते प्रकृतिः।।५९।।**

**अन्वयः**- यथा नर्तकी सङ्गस्य दर्शयित्वा नृत्यात् निवर्तते तथा प्रकृतिः पुरुषस्य आत्मानं प्रकाश्य विनिवर्तते।

**भावार्थः**- यथा नर्तकी नाट्यशालास्थान् प्रेक्षकान् प्रति नृत्यं दर्शयित्वा नृत्यात् निवर्तते, तथैव प्रकृतिरपि पुरुषं प्रति स्वस्वरूपं दर्शयित्वा ततो निवृत्ता भवति एवं स्वाभाविकीयं अस्याः निवृत्ति।। ५९।।

**नानाविधैरुपायैरुपकारिण्यनुपकारिणः पुंसः।**
**गुणवत्यगुणस्य सतस्तस्यार्थमपार्थकं चरति।। ६०।।**

**अन्वयः**- उपकारिणी गुणावती (प्रकृतिः) नानाविधैः उपायैः तस्य अनुपकारिणः अगुणस्य पुंसः अर्थम् उपार्थकम् चरति।

**भावार्थः**- सत्त्वादिगुणमयी प्रकृतिः उपकारासमर्थस्य गुणातीतस्य सतः पुरुषस्यस्वीयप्रयोजनचिन्तां विनैव नानाविधैरुपायैः उपकारिणी सती तत् भवबन्धविमोक्षरूपं कार्यमाचरति।। ६०।।

**प्रकृतेः सुकुमारतरं न किञ्चिदस्तीति मे मतिर्भवति।**
**या दृष्टाऽस्मीति पुनर्न दर्शनमुपैति पुरुषस्य।। ६१।।**

**अन्वयः**- प्रकृतेः सुकुमारतरम् किञ्चित् न अस्ति इति मे मतिः भवति (यतो हि) या दृष्टा अस्मि इति पुनः पुरुषस्य दर्शनं न उपैति।

**भावार्थः**- प्रकृतेरप्यतिसुकुमारं - सलज्जं किञ्चिदप्यन्यत् वस्तु नास्तीत्येव मे मतिर्मवति। यतः याऽसौ प्रकृतिः विवेकपूर्वकं पुरुषेणाहं साक्षात्कृतेति यदा विजानाति, तत्प्रभृति पुनः पुरुषस्य नैव गोचरीभवति।। ६१।।

**तस्मान्न बध्यतेऽद्धानमुच्यतेनाऽपि संसरति कश्चित्।**
**संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः।। ६२।।**

**अन्वयः**- तस्मात् न कश्चित् (पुरुषः) बध्यते, न मुच्यते, न अपि संसरति। नानाश्रयाः प्रकृतिः संसरति, बध्यते, मुच्यते च (इति) अद्धा।

**भावार्थः**- यतः पुरुषोऽसौ अगुणः अपरिणमि च, अत एव कश्चिदपि पुरुषः अद्धा - वस्तुत - साक्षात् न बद्धो भर्वात, न संसरति - धर्मादिनिमित्तं प्रेत्यभावापर नामानं परलोकादिगमनरूपं संसारं नाप्नोति, नापि मुक्तो भवति। यथोक्तम्-

"न निरोधो नचोत्पत्तिः न बद्धो न च साधकः।
न मुमक्षुः न वै मुक्तः इत्येषा परमार्थता" इति।।

तथाच - प्रकृतिरेव नानापुरुषाश्रया सती बद्धा, संसरति मुक्ता च भवति। ततश्च-पुरुषोऽयं चैतन्यमात्रवपुः कूटस्थो नित्यमुक्तः एव। सांसारिक सुखदुःखानुभवरूपो भोगस्तु परिणामिन्याः बुद्धेरेव धर्मः। तादृशबुद्धिच्छायापत्त्या तदैक्यमिवापन्नस्य पुरुषस्य तद्दर्शनमात्रमेव भोगः। तेन तस्य विवेकाग्राहात् आध्यासिकं भोक्तृत्वम्। विवेकख्यात्या भोक्तृत्वाध्यासमात्रनिवृत्तिरेव मोक्षः इति सिद्धम्।। ६३ ।।

**रूपैः सप्तभिरेव तु बध्नात्यात्मानमात्मना प्रकृतिः।**
**सैव च पुरुषार्थं प्रति विमोचयत्येकरूपेण।। ६३ ।।**

**अन्वयः**- प्रकृतिः तु आत्मना सप्तभिः रूपैः आत्मानम् एव बध्नाति, सा एव च एकरूपेण पुरषार्थम् प्रति विमोचयति।

**भावार्थः**- प्रकृतिः धर्माधर्मैश्वर्यानैश्वर्यवैराग्यावैराग्याज्ञानरूपैः सप्तभिर्भावैः आत्मना - बुद्धिरूपेण आत्मानं बध्नाति। सैव च प्रकृतिः पुरुषस्य स्वरूपावस्थानलक्षणं पुरुषार्थमुद्दिश्य केवलं ज्ञानाख्येनैकेन भावेन विमोचयति - पुनर्भोगापवर्गो अकृत्वा संसारात् निवर्तयति।। ६३ ।।

**एवं तत्त्वाभ्यासान्नास्मि न मे नाहमित्यपरिशेषम्।**
**अविपर्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानम्।। ६४ ।।**

**अन्वयः**- एवं तत्त्वाभ्यासात् 'न अस्मि', 'न मे, 'न अहम्' इति अपरिशेषम् अविपर्ययात् विशुद्धम् केवलम् ज्ञानम् उत्पद्यते।

**भावार्थः**- इत्थं तत्त्वविषयज्ञानाभ्यासात् संशयभ्रमादिरहिततया प्रमात्मकं मिथ्याज्ञानासंस्पृष्टं सम्पूर्णं 'अक्रियोऽहम् अकर्ताऽहम्, किञ्चित्प्रत्यपि स्वामिता मयि नास्ति" इत्येवंरूपं परिशुद्धं ज्ञानमुत्पद्यते।। ६४ ।।

**तेन निवृत्तप्रसवामर्थवशात् सप्तरूपविनिवृत्ताम्।**
**प्रकृति पश्यति पुरुषः प्रेक्षकवदवस्थितः स्वच्छः ।।६५ ।।**

**अन्वयः**- तेन प्रेक्षकवत् अवस्थितः स्वच्छः पुरुषः अर्थवशात् निवृत्तप्रसवाम् सप्तरूपविनिवृत्ताम् प्रकृतिम् पश्यति।

**भावार्थः**- तेन च विशुद्धतत्त्वाज्ञानेन - सम्पादनीयकार्यशेषशुन्याम्, विवेकज्ञानसामर्थ्यात् धर्मादिभावसप्तकान्निवृत्तां प्रकृतिम्, पुरुषः प्रेक्षकवद्वर्तमानः उदासीनः सुस्थः - रजस्तमोवृत्तिकलुषया बुद्‌ध्य अमिश्रितश्च सन् पश्यति ।। ३५ ।।

**दृष्टा मयेत्युपेक्षक एको दृष्टाऽहमित्युपरमत्यन्या**
**सति संयोगेऽपि तयोः प्रयोजनं नास्ति सर्गस्य ।। ६६ ।।**

**अन्वयः**- एकः मया दृष्टा इति उपेक्षकः, अन्या अहम् दृष्टा इति उपरमति, (अतः) तयोः संयोगे सति अपि सर्गस्य प्रयोजनम् नास्ति।

**भावार्थः-** 'प्रकृतिरीदृशी मया दृष्टा' इति निश्चित्य तां उपेक्षते, न पुनः द्रष्टुमिच्छति। प्रकृतिश्च 'पुरुषेणाहमेवं दृष्टा' इति निश्चित्य विरमति न पुनस्तं स्प्रष्टुं यतते। एवमुभयोरप्युदासीनत्वात् तयोः प्रकृतिपुरुषयोः संयोगेऽपि इतः परं तस्याः सृष्टेः प्रयोजनं न विद्यते।। ६६।।

**सम्यग्ज्ञानाधिगमात् धर्मादीनामकारणप्राप्तौ।**

**तिष्ठति संस्कारवशात् चक्रभ्रमिवद्धृतशरीरः।। ६७।।**

**अन्वयः-** सम्यग्ज्ञानाधिगमत् धर्मादीनामकारणप्राप्तौ (अपि) संस्कारवशात् चक्रभ्रमिवत् धृतशरीरः तिष्ठति।

**भावार्थः-** विशुद्धतत्त्वज्ञानोदयेन धर्माधर्मादीनामस्मिन् स्वकीयफलदानसामर्थ्येकुण्ठिते देहारम्भकादृष्टवशात् अयं जीवन्मुक्तः वेगवशात् किञ्चित्कालानुवृत्तचक्रभ्रमणन्यायेन कालविशेषपर्यन्तं धृतशारीरस्सन् तिष्ठति।।६७।।

**प्राप्ते शरीरभेदे चरितार्थत्वात् प्रधानविनिवृत्तौ।**

**ऐकान्तिकमात्यन्तिकमुभयं कैवल्यमाप्नोति।।६८।।**

**अन्वयः-** शरीरमेदे प्राप्ते (भोगापवर्गयोः) चरितार्थत्वात् प्रधानविनिवृत्तौ (पुरुषः) ऐकान्तिकम् आत्यन्तिकम् (इति च) उभयम् कैवल्यम् आप्नोति।

**भावार्थः-** प्रारब्धकर्मशेषानुभवेन कर्मानुगुणोत्पन्नशरीरनाशे जाते कृतार्थत्वात् प्रकृतिविनिवृत्तौ, पुरुषः अवश्यं आत्यन्तिकदुखनिवृत्तिः प्राप्रोति।। ६८।।

**पुरुषार्थज्ञानमिदं गुह्यं परमर्षिणा समाख्यातम्।**

**स्थित्युप्तत्तिप्रलयाश्चिन्त्यन्ते यत्र भूतानाम्। ६९।।**

**अन्वयः** इदं गुह्यं पुरुषथज्ञानम् परमर्षिण समाख्यातम्, यत्र भूतानाम् स्थित्युत्पत्तिप्रलयाः चिन्त्यन्ते।

**भावार्थः-** यत्र शास्त्रे सकलभुतानामपि सृष्टिस्थितिलयाः अविर्भावावस्थानतिरोभावाः एवं विचार्यन्ते, तादृशं इदं गुह्यं - साधारणबुद्धीनां असंस्कारिणां दुर्ज्ञेयम्, मोक्षरूपपरमपुरुषार्थज्ञानहेतुभूतं साङ्ख्यशास्त्रम् परमर्षिणा श्रीमता कपिलेन कथितम् ।। ६९।।

**एतप्तवित्रमग्र्यं मुनिरासुरयेऽनुकम्पया प्रददौ।**

**आसुरिरपि पञ्चशिखाय तेन च बहुधा कृतं तन्त्रम् ।। ७०।।**

**अन्वयः-** मुनि अनुकम्पया एतत् पवित्रम् अग्र्यम् (ज्ञानम्) आसुरये प्रददौ, आसुरि अपि पञ्चशिखाय (प्रददौ), तेन च तन्त्रम् बहुधा कृतम्।

**भावार्थः-** एतच्च बुद्धेः पिवित्रतासम्पादकं उत्तमं साङ्ख्यतत्त्वं कपिलो मुनिः आसुरिनाम्रे शिष्याय उपदिदेश। स च पञ्चशिखाख्यशिष्यायोपदिदेश। तेन चैतत् शास्त्रं शिष्यप्रशिष्यादिभ्यः उपदेशादिद्वारा बहुधा विस्तृतं कृतम्।। ७०।।

**शिष्यपरम्परयाऽऽगतमीश्वरकृष्णेन चैतदार्याभिः।**

**संक्षिप्तमार्यमतिना सम्यग्विज्ञाय सिद्धान्तम् ।। ७१।।**



**अन्वयः-** आर्यमतिना ईश्वकृष्णेन च शिष्यपरम्परय आगतम् एतत् सिद्धान्तम् सम्यक् विज्ञाय आर्याभिः संक्षिप्तम्।

**भावार्थः**- ततश्चेत्थमेव शिष्यपरम्परया अनुवर्तितं एतत् साङ्ख्यशास्त्रं आर्यमतिना ईश्वरकृष्णेन अध्ययनभावनाभ्यां सम्यक् सिद्धान्तज्ञानार्जनपूर्वकं विज्ञाय आर्याख्यछन्दस्सन्दृब्धैः पद्यैः संगृह्य निरूपितम्।। ७१।।

**सप्तत्यां किल योऽर्थास्तेऽर्थाः कृत्स्नस्य षष्टितन्त्रस्य।**
**आख्यायिकाविरहिताः परवादविवर्जिताश्चापि।। ७२।।**

**अन्वयः**- सप्तत्याम् ये अर्थाः ते कृत्स्नस्य षष्टितन्त्रस्य आव्यायिकाविरहिताः परवादविवर्जिताः अपि च अर्थाः (सन्ति)।

**भावार्थः**- अस्यं कारिकासप्तत्यां कथा - तदनुगुणदृष्टान्तादिरहिताः मतान्तरानुवादादिविरहिताश्च ये अर्थाः कथिताः, ते सम्पूर्णस्य प्रकृत्यदिषष्टिपदार्थव्युत्पादकस्य षष्टितन्त्राख्यसाङ्ख्यशास्त्रस्यैवार्थाः इति ज्ञेयम्।।

# सांख्यकारिका

"संख्यां प्रकुर्वते चैव, प्रकृतिं च प्रचक्षते।
तत्त्वानि च चतुर्विंशति, तेन सांख्यं प्रकीर्तिम्'।।

सम्यक्प्राकारेण क्रमपूर्वकं ख्यानं, कथनं यस्याः सा 'संख्या' क्रमपूर्वकविचारणा। सम्यक् ख्यायते, प्रकाश्यते, वस्तुतत्वमनया इति संख्या, सम्यक् ज्ञानमस्त्यत्रेति वा संख्या, तस्यां प्रकाश्यमानं आत्मतत्वं अत्रप्रतिपाद्यते इति सांख्यम् इति भगवद्गीता श्रीधरीये उच्यते। पंचविंशतितत्त्वानां विचारः एव सांख्यम्, तमधिकृत्य कृतो ग्रन्थः 'सांख्यम्' इत्युच्यते। अर्थात्, प्रकृतिपुरुषयोः पृथक्-पृथक् संख्यानम् एव सांख्यम्, अथवा प्रकृति-पुरुषयोः पृथक् - पृथक् संख्यया अपवर्गः। अत्र ज्ञातव्यमस्ति यत् 'सांख्य' शब्दः सम् उपसर्गपूर्वकं 'चक्षिञ्' ख्याञ् धातोः अण् - प्रत्ययेन निष्पन्नः। अत एव अस्यार्थः सम्यम् ख्यानम् इति निश्चीयते। अत्र प्रकृतिपुरुषविवेकविचारः, पुरुषस्वरूपविचारः, गुणत्रयविचारः, सृष्टिविचारः, महदहंकारादीनां च सम्यग् विचारः समुपलभ्यते। सांख्याख्यं दर्शनमिदम् वेदमूलकं प्राचीनतमं चास्ति। कपिलः एव शास्त्रस्यास्यप्रमुखः आचार्यः। ईश्वरकृष्णस्य सांख्यकारिका, वाचस्पतिमिश्रस्य तत्वकौमुदी इत्यादयो ग्रन्थाः शास्त्रेऽस्मिन् सुविदिताः। आसुरि, पञ्चाशिखादयः आचार्याः अस्यशास्त्रस्य प्रवर्तकाः इती गणयान्ति।

## 1. सांख्यशास्त्रस्य प्रयोजनं निरूपयत?

दुःखत्रयाभिघाताज्जिज्ञासा तदपघातके हेतौ।
दृष्टे साऽपार्था चेन्नैकान्तात्यन्ततोऽभावात्।। - सांख्यकारिका।। 1।।

अत्रदुःखत्रयं नाम 1. अध्यात्मिकं 2) आधिभौतिकं 3) आधिदैविकञ्च। तत्रापि शारीरं मानसं चेति भेदेन आध्यात्मिकं द्विविधम्। यथा दृष्टसाधनैः त्रिविधदुःखानामात्यन्तिकमैकान्तिकं च समाधानम् भवितुं न शक्नोति, तथैवानुश्रविकसाधनैः अपि दुःखनिवृत्तिरसंभवा। अर्थात् सर्वैः दुष्टानुश्रविकसाधनैः दुःखानां समूलोच्छेदः भवितुं न शक्तनोति।

दृष्टवदानुश्रविकः स ह्यविशुद्धिक्षयातिशययुक्तः।
तद्विपरीतः श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानात्।। 2 ।।

'व्यक्ताव्यक्तज्ञविज्ञानात्' इत्यत्र व्यक्तं च अव्यक्तं च ज्ञश्च तेषां समाहारः 'व्यक्ताव्यक्तज्ञाः' इत्येषां विज्ञानम् इति 'व्यक्ताव्यज्ञविज्ञानम्' तस्मात् व्यक्ताव्यक्तज्ञविज्ञानात् दुःखत्रयनिवृत्तिः। अत्र महदादिभूतपर्यन्तं सकलप्रपञ्चं व्यक्तम्, मूलप्रकृतिस्तु अव्यक्तं सैव प्रधानमित्युच्यते, ज्ञश्च पुरुषः। एतेषां विवेकेन दुःखत्रयस्यात्यन्तिकैकान्तिकनिवृत्तिः। अयमेवापवर्गः मोक्षः वा सांख्यदर्शनस्य परमप्रयोजनमस्ति।

## 2. सांख्यदर्शनस्य चतुर्विधानि प्रमेयानि निरूपयत?

सांख्यमते चतुर्विधानि प्रमेयानि निरूपितानि, तत्र काचित् केवलं प्रकृतिः, काचित् प्रकृति-विकृतयः, केचित् केवलं विकृतयः, कश्चिच्च न प्रकृतिः न विकृतिश्च। यथोक्तं श्रीमदीश्वरकृष्णेन सांख्यकारिकायाम्-

मूलप्रकृतिरविकृतिः महदाद्याः प्रकृतिविकृतयः सप्त।
षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः ।। (सां . का - 3)

अत्र मूलतः प्रकर्षेण करोतीति प्रकृतिः मूलप्रकृतिर्वा। सैव मूलप्रकृतिः प्रधानम् अव्यक्तं वेति उच्यते। प्रकृतिविकृतयः महदाद्याः सप्त। ते च महत् (बुद्धिः), अहंकारः, पञ्चतन्मात्राणि च सन्ति। षेडकस्तु विकारः विकृतिरेव। अर्थात् षेडशकानां तत्त्वानां समूहः एकादशेन्द्रियाणि पञ्चमहाभूतानि च केवलं विकृतिरेव सन्ति। प्रकृति - विकृतिभ्यां भिन्नः अनुभयरूपः पुरुषः न प्रकृतिः, न विकृतिः एव अस्ति। स तु केवल साक्षीरूपेण द्रष्टा मात्रमस्ति।।

## 3. सांख्यशास्त्रे प्रमाणानि निरूपयत?

दृष्टमनुमानमाप्तवचनं च सर्वप्रमाणसिद्धत्वात्।
त्रिविधं प्रमाणमिष्टं प्रमेयसिद्धिः प्रमाणाद्धि।। 4 ।।

'प्रमाकरणं प्रमाणम्' अथवा 'प्रमीयतेऽनेन इति प्रमाणम्' इति निर्वचनात् प्रमां प्रति करणत्वमवगम्यते। तच्चासन्दिग्धाविपरीतानधिगतविषया चित्तवृत्तिः। बोधश्र्च पौरुषेयः फलं प्रमा, तत्साधनं प्रमाणमिति। दृष्टप्रमाणम्, अनुमानप्रमाणम्, आप्तवचनप्रमाणमिति त्रिविधं प्रमाणम् इष्टम् अभीष्टम् वा। तत्र चक्षुश्रोत्र - घ्राण - रसना-त्वगाख्यानि पञ्चज्ञानेन्द्रियाणि। तैः रूपशब्द-गन्ध-रस-स्पर्शानामनुभूतिः जायते। एवं ज्ञानेन्द्रियैः रूपादिविषयग्रहणजनितं ज्ञानं विषयेन्द्रियसन्निकर्षजन्यं ज्ञानं वा दृष्टमित्युच्यते। तदैव प्रत्यक्ष इत्यभिधीयते। पुनः लिंगलिंगि-पूर्वकं यत् ज्ञानं भवति स एव अनुमानम् इत्युत्यते अर्थात्, यत्तु धूमरूपेण लिंगेन वह्निरूपलिंगिग्रहणम् तदनुमानम्। आप्तजनप्रोक्तं सच्छास्त्रवचनं वा शब्दप्रमाणम् आप्तवचनप्रमाणमिति उच्यते।

### प्रत्यक्षप्रमाणम्

**"प्रतिविषयाध्यवसायो दृष्टम्"** इत्यनुसारेण विषयं प्रति इन्द्रियाणां यदध्यवसायः सन्निकर्षः तदात्मकं च ज्ञानम् अथवा तज्जन्यं प्रमाणम् दृष्टमिति अभिप्रायः। अर्थात्, इन्द्रियाणि विषयं प्रति सन्निकर्षं प्राप्य तत्स्वरूपं गृहीत्वा मनसे प्रयच्छन्ति, मनः तत्र संकल्प्य अहंकाराय, अहंकारश्च महते प्रयच्छति, महांश्च कर्त्तव्याकर्त्तव्यं निर्णीय कर्मेन्द्रियेभ्यः आदिशति। इति तत्र प्रक्रिया।

### अनुमानप्रमाणम्

प्रत्यक्षकार्यत्वादनुमानं प्रत्यक्षानन्तरं लक्षणीयम्। तत्रापि सामान्यलक्षणपूर्वकत्वाद्विशेषलक्षणस्यानुमानसामान्यं तावल्लक्षयति - **"तल्लिङ्गलिङ्गिपूर्वकम्"** इति। लिङ्ग व्याप्यम्। लिङ्गि व्यापकम्।

लिंग - लिंगिपूर्वकं ज्ञानमनुमानम्; यथा धूमादिकं दुष्ट्वा वह्न्यादिज्ञानम्। तत्तु पूर्ववत्, शेषवत्, सामान्यतोदृष्ट-भेदात् त्रिविधम्

**आप्तप्रमाणम्**

"**आप्तश्रुतिराप्तवचनम्**' इति। अत्र श्रुतिः वेदः इति शब्दात् वेदमूलकानि पुराणादिवाक्यानि तथा च वेदतत्त्वज्ञानाम् आचार्याणां वचांस्यपि गृहीतव्यानि।

**4. सतां पदार्थानाम् अनुपलब्धेः कारणानि व्याख्यायताम्।**

अतिदूरात् सामीप्यादिन्द्रियघातान्मनोऽनवस्थानात्।
सौक्ष्म्याद् व्यवधानादभिभवात् समानाभिहाराच्च।।

सतोऽपि वस्तुनः अनुपलब्धिः सम्भवत्येव, यतः-

(i) **अतिदूरात्** - यथा वियति उत्पतन् पतत्री अतिदूरतया सन्नपि प्रत्यक्षेण नोपलभ्यते। एवमेव ग्रहोपग्रहाणाम् अप्रत्यक्षत्वम् अपि बोध्यम्।

(ii) **सामीप्यात्** - अतिसामीप्यादपि इन्द्रियाणाम् अग्राह्यत्वम् भवत्येव, यथा लोचनस्थमञ्चनम्, अतिसामीप्यान्न दृश्यते।

(iii) **इन्द्रियघातात्** - इन्द्रियवैकल्यादपि सतो वस्तुनः ग्रहणं न सम्भवति। यथा अन्धत्वात् कक्षस्थस्य घटस्याभावः बधिरत्वात् निकटोच्चार्यमाणस्य शब्दस्य अप्रत्यक्षं भवत्येव।

(iv) **मनोऽवनस्थानात्** - मनसः अन्यत्रव्यापृतत्वादपि सतो वस्तुनः ग्रहणं न सम्भवति। यथोक्तं वाचस्पतिमिश्रेण - यथा कामाद्युपहतमनाः स्फीतालोकमध्यवर्तिनम् इन्द्रियसन्निकृष्टमर्थमपि न पश्यति।

(v) **सौक्ष्म्यात्** - यथेन्द्रियसन्निकृष्टं परमाण्वादयः न दृश्यन्ते। वायुमण्डलस्थजीवाणुविषयेऽपि तदेव न्यायं गृह्यते। तथैव प्रकृति - महदहंकारमनसां सौक्ष्म्यादनुपलब्धिः नाभावः

(vi) **व्यवधानात्** - इन्द्रियार्थयोर्मध्ये भित्यादीनां व्यवधाने जाते सतोऽपि वस्तुनः अलक्ष्यत्वं मन्यते। यथा भित्तिव्यवधानात् कक्षस्थितोऽपि जनः दृग्गोचरः न भवति।

(vii) **अभिभावात्** - यथा, दिवसे सूर्यप्रभाभिभूतं नक्षत्रमण्डलं न लक्ष्यते, न तु अभावात्।

(viii) **समानाभिहारात्** - समानाकारे वस्तुनि सम्मेलनत्वात्। यथा, जलाशये मेघमुक्तजलबिन्दवः न पश्यन्ते।

इत्थं सुस्पस्ष्टं यत् न प्रत्यक्षनिवृत्तिमात्राद् वस्त्वभावो भवति, अतिप्रसंगात्, यथा - गृहाद्विनिर्गतो गृहजनमपश्यंस्तदभावं विनिश्चिनुयात्, न त्वेवम्, अपितु योग्यप्रत्यक्षनिवृत्तेरयमभावं निविश्चिनोति।

**5. सत्कार्यवादः सांख्यकारिकोक्तरीत्या विशदयत?**

भगवता श्रीमदीश्वरकृष्णेन प्रोक्तं तथ्यमिदं यत् नासत सदुत्पत्तिः, न च सतोऽसज्जायते। अत्र सत्कार्यम् इति साध्यम्। अतः सत्कारणादेव सत्कार्योत्पत्तिर्जायते, किंवा कार्यं स्वोत्पत्तिपूर्वमेव कारणे वर्तते इति, यथोक्तं सांख्यकारिकायाम्,

असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात्।
शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम्।।

**असदकरणदिति** असत् चेत् कारणव्यापारात् पूर्वं कार्यम्, नास्य सत्त्वं केनापि कर्तुं शक्यते। नहि नीलं शिल्पिसहस्रेणापि पीतं कर्तुम् शक्यम्। सतश्चाभिव्यक्तिः उपपन्ना, यथा पीडनेन तिलेषु तैलम्। अवघातेन धान्येषु तण्डुलम् इत्यादिः।

**उपादानग्रहणादिति** सिद्धम् यत् उपादानैः कारणविशेषैः एव विशिष्टानां कार्यणाम् अविर्भावः। उपादानकारणाभावे कार्योत्पत्तिः न सम्भवति, न च निमित्तादिभिः कारणैः कार्यस्य उत्पत्तिर्लोके दृश्यते।

**सर्वसम्भवाभावात्,** अर्थात् न हि सर्वेभ्यः कारणेभ्यः सर्वं कार्यमुत्पद्यते प्रत्यक्षविरोधात्। मृत्पिण्डं घटस्येव कारणं न तु पटस्य। अतो कारणे कार्यस्य पूर्वमेव सम्बन्धः स्वीकार्यमित्यर्थः।

**शक्तस्य शक्यकरणात्,** अर्थात् यत्कारणं यत्कार्यस्योत्पत्तौ समर्थं भवेत्, तत्कारणं तस्यैव जनकः इति च स्वीकार्यम्। न च यत्र यस्य अशक्तिः, तत्र तस्य उप्तत्तिः सम्भाव्यते।

**कारणभावाच्च**, अर्थात् कार्यं कारणरूपमेव भवति। कार्यकारणात्मकं भवति इत्यभिप्रायः। नहि कारणाद् भिन्नं कार्यम्। तस्मात् सत्कार्यम् इति सिद्धम्।।

**6. पुरुषस्वरूपम् पुरुषबहुत्वञ्च साधयत?**

संघातपरार्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानात्।
पुरुषोऽस्ति भोक्तृभावात् कैवल्यार्थं प्रवृत्तेश्च।।

अर्थात् संघातपरार्थत्वात्, त्रिगुणादिविपर्ययात्, अधिष्ठानात्, भोक्तृभावात्, कैवल्यार्थं प्रवृत्तेः च पुरुषोऽस्ति इति सिद्धम्। तत्र-

(i) **संघातपरार्थत्वात्** - चतुर्विंशतितत्तवात्मकम् एतत् संघातः परार्थे एव भवति। सः परः असंघातरूपः पुरुषः इति।

(ii) **त्रिगुणादिविपर्ययात्** - अत्र त्रिगुणादिशब्देन - "**त्रिगुणामविवेकिविषयः सामान्यम् अचेतनं प्रसवधर्मि। व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान्।**" इति कारिकायाम् उक्तानि धर्माणि ज्ञेयानि। तथा हि पुरुषः अस्ति त्रैगुण्यादिधर्माणाम् त्रैगुण्यरहिततत्त्वार्थत्वात्। अतः त्रैगुण्यादिधर्मरहितस्य पुरुषस्य अस्तित्वम् सिद्धम्।

**(iii)** **अधिष्ठानात्** - संसारेऽस्मिन् यद्यत् सुखः दुःख मोहात्मकं तत्सर्वं परेणाधिष्ठीयमानं दृष्टम्, रथादिर्यन्त्रादिभिः। सुख दुःख मोहात्मकं चेदं बुद्ध्यादिः, तस्मादेतदपि परेण अधिष्ठातव्यम्। स च परस्त्रैगुण्यादन्यः पुरुष एवास्ति।

**(iv)** **भोक्तृभावात्**- चतुर्विंशतितत्त्वानां भोक्ता तु पुरुषः एवं अस्ति भोग्यत्वात्। सुखदुखमोहात्मकत्वात् प्रकृत्यादि महाभूतपर्यन्तम् प्रपंचमेतत् भोग्यमेव। अतः एतेषां भोगानां भोक्ता पुरुषः अस्ति एव, यः सुख-दुःखादिरहितः त्रिगुणादिरहितः वा उच्यते।

**(v)** **कैवल्यार्थं प्रवृत्तेः** लोकव्याप्तस्य दुःखत्रयस्य ऐकान्तिकमात्यन्तिक निवृत्यर्थं दिव्यदृष्टयः ज्ञानिनः क्रान्तिदर्शिनो वा मुन्यः प्रयतमाना दृश्यन्ते। तत्र नित्यचेतनस्य अस्य पुरुषस्य कैवल्यार्थे प्रवृत्तिः सत्त्वादेव जायते। इति वृद्धजनप्रमाणाच्च पुरुषस्य सत्ता अवश्यमेव स्वीकरणीया।।

सांख्यमतानुसारेण पुरुषबहुत्वमपि सिद्धं भवति।

जनन-मरण-करणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च।
पुरुष-बहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव।।

संसारेऽस्मिन् सर्वत्र जनन-मरण-करणानां प्रतिनियमो दृश्यते। एकस्य जाते सति न हि सर्वे जायन्ते, न वा एकस्य मृते सति सर्वे म्रियन्ते। इति प्रत्यक्षप्रमाणबलात् प्रतिशरीरभिन्नपुरुषत्वं सिद्धम्, तथा च एकस्य अन्धत्व-बधिरत्वादि दोषोपपन्ने सति न हि सर्वे अन्धत्व-बधिरत्वादि-देष-दूषिताः भवन्ति। अनेन सुस्पष्टं यत् प्रतिशरीरभिन्नपुरुषत्वं पुरुष बहुत्वं वा सिद्ध्यत्येव। एकस्य प्रयतमाने सति अपरः स्वपिति, एकस्य अध्ययने प्रवृत्ते सति अपरः भुनक्ति, इति प्रतिशरीरभिन्नक्रियत्वात् अयुगपत्प्रवृत्तेश्च पुरुषबहुत्वं सुस्पष्टम्। पुनश्च त्रयाणां गुणानां समाहारः त्रिगुणम्, तस्य भावः त्रैगुण्यम्, तस्य त्रैगुण्यस्य विपर्ययः त्रैगुण्यविपर्ययः, तस्मात् त्रैगुण्यविपर्ययात्। इत्थं पुरुषस्य प्रतिशरीरभिन्नत्वं ग्राह्मम्।

## 7. सांख्यमतानुसारेण प्रकृतिस्वरूपं निरूपयत।

सौक्ष्म्यात्तदनुपलब्धिर्नाभावात् कार्यतस्तदुपलब्धेः।
महादादि तच्च कार्यं प्रकृतिसरूपं विरूपं च।।

प्रकृतेः अनुपलब्धिः सौक्ष्म्यात् भवति, न तु अभावात्। यतः अतिसौक्ष्म्याद् अपि सतो वस्तुनः अप्रत्यक्षत्वम्, यथा परमाण्वादीनाम्। कार्यतः प्रकृतेः उपलब्धिस्तु भवत्येव। तदयमत्र अनुमानस्वरूपम्-

यद्यत् कार्यं तत्ततु सकारणाम्, यथा घटः। महदादिश्च कार्यम्, अतोऽस्य सकारणत्वम् सुनिश्चितम्, तत् कारणमेव प्रकृतिः। एवं प्रकृतेः सिद्धे सति महदादिकार्याणां विषये प्रस्तौति प्रकृति सरूपं विरूपं च इति महदादयः महदहंकार-पंचतन्मात्र-पंचमहाभूत-एकादशेन्द्रियवर्गाणां प्रकृतेः सादृश्यम् असादृश्यं च, तदैव समुपस्थापयति कारिकाभ्याम्-

हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिंगम्।
सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम्।।
त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि।
व्यक्तं तथा प्रधानम्................................ इति।

प्रकृतिस्वरूपं निरूप्य आह -

भेदानां परिमाणात्समन्वयाच्छक्तितः प्रवृत्तेश्च।
कारणकार्यविभागादविभागाद्वैश्वरूप्यस्य।।
कारणमस्त्यव्यक्तम् प्रवर्तते त्रिगुणतः समुदयाच्च।
परिणामतः सलिलवत् प्रतिप्रतिगुणाश्रयविशेषात्।।

महदादिरूपेण भिन्नानां कार्याणां कारणरूपं प्रधानं अस्ति। कुतः? कार्याणां घटादिवत् परिमितत्वात् अव्यापित्वात्, अध्यवसायादिलक्षणतत्तदसाधारणधर्मवत्वेन मिथोभिन्नानामपि बुद्ध्यादीनां सुखादिरूपसाधारणधर्म वत्तया एकरूपत्वात्, तच्छक्तादेव कारणात् तत्कार्यस्य प्रवृत्तेः, उत्पत्तिकाले सत एव कार्यस्य कारणसकाशादाविर्भावात्, कृत्स्नस्यापि कार्यस्य संहारकाले कारणे एव तिरोभावच्च।। तच्चाव्यक्तं सत्त्वादिगुणत्रयात् परस्परसंमिश्रणाच्च प्रवृत्तं भवति। तत्र च यथा - एकमेव सलिलं नारिकेलजम्बीरादिपरिणाममेदात् मधुरतिक्तादिभावं प्रतिपद्यते, तद्वत् प्रधानमपि एकैकगुणस्य भिन्नभिन्नमात्राणां संमेलनात् नानाविधकार्यरूपतां भजते।।

## 8. सांख्यमतानुसारेण सृष्टिक्रमः

सृष्टिक्रममुपस्थापयन् आह, श्रीमदीश्वरकृष्णः-

प्रवृतेर्महांस्ततोऽहंकारस्तस्माद् गणश्च षोडशकः
तस्मादपि षोडशकात् पञ्चभ्यः पञ्चभूतानि।।

अर्थात् प्रकृतेः गुणवैषम्यात् प्रथमं महत्-तत्त्वे जायते। तस्ताम् महतः अहङ्कारः, अहंकाराद् एकादशेन्द्रियाणि पंचतन्मात्राणि च समुद्भवन्ति। तेभ्योऽपि पंचतन्मात्रेभ्यः पंचभूतानि जायन्ते। तत्र तन्मात्राणि शब्द - स्पर्श-रूप-रस-गन्धानि क्रमशः पंचमहाभूतानि आकाश-वायु-तेज-जल-पृथिव्यान्युत्पादयन्ति। एकादशेन्द्रियेषु चक्षु-श्रोत्र-घ्राण-रसना-त्वगाख्यान पंचज्ञानेन्द्रियाणि इति अभिधीयते ज्ञानकरणात्वात्। ते क्रमशः रूप गन्ध-रस-सपर्शान् गृह्णन्ति। इत्यराणि कर्मेन्द्रियाणि वाक्-पाणि-पादि-पायु- उपस्थानि, वचनादानविहरणोत्सर्गानन्दांश्च कुर्वन्ति।

## 9. श्रीमदीश्वरकृष्णस्य सांख्यकारिकाम् अनुसृत्य गुणानां स्वरूप - कार्य - प्रयोजनानि निरूप्यताम्।

प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः।
अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः।।
सत्त्वं लघुप्रकाशकमिष्टम् उपष्टम्भकं चलञ्च रजः।
गुरुवरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः।।




सत्त्वरजस्तमांसि इति त्रयः एव गुणाः सांख्यदर्शने निरूपिताः। ते एव जगतः मूलकारणत्वे प्रकृतित्वं भजन्ति। तत्र सत्त्व-रज-तमस्- संज्ञकाः त्रिगुणाः प्रित्यप्रीतिविषादात्मकाः सन्तीति। प्रीतिः सुखम्, अप्रीतिः दुःखम्, विषादो मोहः।

इमे गुणाः सप्रयोजनाः सन्ति। अत एवोक्तम् - "प्रकाशप्रवृत्तिनियमार्थाः"। प्रकाशश्च प्रवृत्तिश्च निमयश्च प्रकाशप्रवृत्तिनियमाः, ते एव अर्थाः प्रयोजनानि येषां ते इति विवृतिः। तथा हि सत्त्वं प्रकाशकः, अतिलघुत्वात् मनसः तीव्रतमा गतिः, चक्षुषां च अर्थप्रदेशगमनं तत्र प्रमाणम्।

रजोगुणः प्रवृत्तिकरः तेन संसरणशीलत्वम् संसारस्य कार्याकार्ये प्रवृत्तिः लोकस्य। तथा च रजोगुणप्रभावादेव वृद्धि क्षय-विनाशादीनां पाकानां सम्भवः।

तमोगुणः नियामकः, तेन हि प्रकाशप्रवृत्ति नियम्येते। यथा हि इन्द्रियाणां प्रकाशकत्वेऽपि सीमितशक्तिमत्त्वम्।

त्रिगुणानां प्रयोजनमुक्त्वा क्रियाम् उच्यते- "अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः"। अर्थात् अन्ययोः अभिभवं कृत्वा एकः समुत्तिष्ठतीति अन्योन्याभिभवः। तथा हि सत्त्वं रजस्तमसी अभिभूय शान्तात्मनोवृत्तिं लभते। इत्थं न हि ते परस्पर विरोधशीलाः गुणाः, अपितु विरोधक्रियायाः प्रागव एकक्रियाकर्तृतया परस्परं पूरकत्वं सञ्जायते। अर्थात् पुरुषस्य कैवल्यलाभार्थं तेषां परस्पर विरोधिनां सहकारित्वं सञ्जायते। अत एव उक्तंसांख्यकारिकाकरेण श्रीमदीश्वरकृष्णेन - 'पुरुषार्थ एव हेतुः'।।

## 10. सांख्यसम्मतं बुद्धितत्त्वं निरूपयत।

'अध्यवसायो बुद्धिः' इति कारिकांशेन सुस्पष्टम् अध्यवसायात्मकं दृढ़निश्चयात्मकं ज्ञानं बुद्धिः अर्थात् समानासमानजातीयव्यवच्छेदकत्वम् बुद्धेः असाधारणो व्यापारः। इयं बुद्धिरेव पुरुषस्य साक्षात्भोगसाधनं भवति। अत एव तदेव प्रधानतत्त्वमिति विवेकः। एकादशेन्द्रियाणि अहंकारश्च सर्वान् विषयान् स्वीकृत्य बुद्ध्यै सम्पादयति, तदनन्तरं प्रधानपुरुषान्तरं प्रकृतिपुरुषयोर्विशेषं विशिनष्टि। इत्थं बुद्धितत्त्वं साक्षात्पुरुषार्थसाधकमस्ति। सा बुद्धिः द्विविधाः सात्त्विकी तामसी चेति। सात्त्विकी बुद्धिस्तु धर्मज्ञानवैराग्यैश्वर्यभेदेन चतुर्विधाः पुनश्च तामसी बुद्धिः अधर्माज्ञानावैराग्यानैश्वर्यभेदेन चतुर्विधा। इत्थं बुद्धिः अष्टविधा। तत्र अभ्युदय-निःश्रेयसहेतुः धर्मः। सत्त्वपुरुषान्यथाख्यातिः ज्ञानम्। रागाभावः वैराग्यम्। अणिमा - महिमा -गरिम-लघिमा-प्राप्ति - प्रकाम्य-वशित्वेशित्वादयः ऐश्वर्यम्। तामसास्तु तद्विपरीता बुद्धिधर्माः। यथोक्तम्-

अध्यवसायो बुद्धिधर्मो ज्ञानं विराग ऐश्वर्यम्।
सात्त्विकमेतद्रूपं तामसमस्माद्विपर्यस्तम्।।

## 11. सांख्यकारिकोक्तरीत्या प्रत्ययसर्गः निरूपयत?

एष प्रत्ययसर्गो विपर्ययाशक्तितुष्टिसिद्ध्याख्यः।
गुणवैषम्यविमर्दात् तस्य भेदास्तु पञ्चाशत्।।

प्रतीयतेऽनेन इति प्रत्ययो बुद्धिः तस्य सर्गः प्रत्ययसर्गः। तत्र धर्माधर्मज्ञानाज्ञानवैराग्यावैराग्यैश्वर्यानैश्वर्य भेदादिस्वरूपा रूपोपन्ना बुद्धिः। सैव **अष्टरूपात्मिका** बुद्धिः एकरूपेण अवस्थिता सती समष्ट्या प्रत्ययसर्गेति संज्ञया बोध्यते। तदेव प्रत्ययसर्गः विपर्ययाशक्तितुष्टिसिद्धिभेदेन चतुर्विधः।

अर्थात्, सत्त्वरजस्तमसां गुणानां न्यूनाधिक्यात् प्रत्ययसर्गः पञ्चाशत् भेदवान भवति, किन्तु मुख्यरूपेण सः चतुर्विधः एव (i) विपर्ययः, (ii) अशक्तिः, (iii) तुष्टिः, (iv) सिद्धिश्च। तत्र विर्पययो मिथ्याज्ञानम्, अतस्मिन् तद्बुद्धिः। पंचप्रकारकोऽयं विपर्ययः, (i) तमः, (ii) मोहः, (iii) महामोहः, (iv) तामिस्रः, (v) अन्धतामिस्रश्च। करण- वैकल्यहेतुका अशक्तिः अष्टाविंशतिधा भवति। यथा - आन्ध्य-बाधिर्य-अजिघ्रत्व-मूकत्व-जड़त्व-कुष्ठित्व-पंगुत्व-कौण्य-क्लैव्य-उदावर्त-उन्माद - (एकादशेन्द्रियवधरूपा) - असुवर्णा-अज्ञानमलिना-मनोज्ञा-अदृष्टि-अपरा-सुपरा-असुनेत्रा-वसुनाडिका - अनुत्तमाम्भसिका (तुष्टिवधरूप)- अप्रतार-असुतार - अतारतार - अरम्यक-असदामुदित-

अप्रमोद-अमुदित-आमोदमानाः (सिद्धि-वधरूपाः)। तुष्टिर्नवधा, प्रकृति-उपादान- काल-भाग्य-पार- सुपार-पारापार-अनुत्तमाम्भ-उत्तमाम्भरूपाः च। पुनश्च सिद्धिः अष्टविधाः अणिमा-महिमा- गरिमा-लाघिमा-प्राप्ति-प्राकाम्य-वशित्व-ईशित्वरूपाः। यथोक्तं श्रीमदीस्वरकृष्णेन-

पंचविपर्ययभेगाः भवन्त्यशक्तिश्च करणावैकल्यात्।
अष्टाविंशतिभेदा तुष्टिर्नवधाऽष्टधा सिद्धिः।।

## 12. सांख्यसम्मतं सूक्ष्मशरीरं संक्षेपेण निरूपयत।

सांख्यदर्शने पुरुषः निष्क्रियः स्वीक्रियते। अतः अस्य लोकान्तरगमनं मोक्षोपलब्धिश्च कथं भविष्यति। यतः स्थूलशरीरस्तु अत्रैव भस्मसात्क्रियते, अतः तस्य स्थूलशरीरस्यापि परलोकगमनं न युज्यते। अत एव अष्टादशतत्त्वात्मकं सूक्ष्मशरीरं स्वीक्रियते सांख्यदर्शने। यथोक्तं सांख्यकारिकायां -

पूर्वोत्पन्नम् असक्तं नियतं महदादिसूक्ष्मपर्यन्तम्।
संसरति निरुपभोगं भावैरधिवासितं लिङ्गम्।।

अर्थात् प्रधानेन आदिसर्गे प्रतिपुरुषमेकैकम् उत्पादित सूक्ष्मशरीरम्, यत् महाप्रलयपर्यन्तम् नित्यम् अष्टादशावयवात्म पुरुषस्य धर्माधर्मवाहकं शरीरविशेषम् अस्ति। शरीरेऽस्मिन् बुद्धिः, अहंकारः, एकादशेन्द्रियाणि, पंचतन्मात्राणि च भवन्ति एतेषामेव यावत्पर्यन्तम् स्थूलशरीरे स्थितिः भवति, तावत् पर्यन्तं शरीरिणां कृते प्राणवान् इति व्यवहारः भवति। यदा इमानि अष्टादशतत्त्वानि स्थूलशरीरं विहाय बहिः गच्छन्ति तदा मृतः इति व्यवहारः भवति। इत्थं पुरुषस्य देहाद्देहान्तर संसरणमेवात्र सूक्ष्मशरीरकल्पनायाः हेतुः यतः अनेन सूक्ष्मशरीरेण विना करणानामपि स्थितिः न सम्भवति, यथोक्तम्

चित्रं यथाऽऽश्रयमृते स्थाण्वादिभ्यो विना यथाच्छाया।
तद्वद्विना विशेषैर्न तिष्ठति निराश्रयं लिङ्गम्।।

## 13. संक्षेपेण सूक्ष्मशरीर-संसरणप्रक्रियाम् उपस्थापयतु।

पुरुषस्य देहाद्देहान्तरे संसरणमेव लिंगशरीरकल्पनायाः हेतुः। एतदेव पुरुषस्य संसरणम्, साक्षात्पुरुष सम्बद्धत्वात्। यथोक्तं श्रीमदीश्वरकृष्णेन-

पुरुषार्थहेतुकमिदं निमित्तनैमित्तिकप्रसंगेन।
प्रकृतेर्विभुत्वयोगान्नटवद् व्यवतिष्ठते लिंगम्।।

अर्थत्, यथा नटः पात्रस्वभाव-वशाद् परशुराम - राम कृष्णादिरूपो भूत्वा तद्वदाचरति। तथेदं सूक्ष्मशरीरमपि मानव पशु-पक्षी-वृक्षादि-विग्रहान् गृहीत्वा तदनुकूलमेव आचरति। नटस्तु सामाजिकान् रसयितुं स्वयं वा धन - यशाद्यावार्जनार्थं पात्रान्तरवेशं गृह्णाति, नहि सूक्ष्मशरीरस्य तथाविधं प्रयोजनम् युज्यते। तस्य प्रयोजनं तु पुरुषार्थ

एव। पुरुषस्य भोगापर्गात्मकप्रयोजनेन हेतुना प्रयुक्तम् इत्यर्थः। तत्र धर्मा-धर्मज्ञानाज्ञानवैराग्यावैराग्यैश्वर्यानैश्वर्यानि निमित्तानि।

इत्थं सुस्पष्टमिदं तथ्यं तत् बुद्धेः सात्त्विकादिस्वभाववशाद् धर्माधर्मादयो ये भावाः स्थुलशरीरं व्याप्नुवन्ति तद्वशात्स्थूलशरीरेण सम्पाद्यमानानं कर्मणां भेगाः अपरिहार्याः एव। पुरुषस्तु बुद्धिप्रतिबिम्बिततत्वात् तानि स्वकीयानि इव मन्यते। अतो तेषां भोगाय तस्यासक्तिर्जायते। तद्वशात् पुरुषस्य भोगापवर्गात्मकं प्रयोजनं सम्पादयितुं सूक्ष्मशरीरं देहान्तरं संसरति। यथोक्तम्-

धर्मेण गमनमूर्ध्वं गमनमधस्ताद् भवत्यधर्मेण।
ज्ञानेन चापवर्गो विपर्ययादिष्यते बन्धः।।

## 14. भौतिकसर्गं संक्षेपेण निरूपयत।

आकाश-वायु-तेज - जल- पृथिवीभ्यः सम्मिलितेभ्यः चराचरात्मकशारीराणि जायन्ते। तदेव भौतिकं सर्गमुच्यते भौतिकसर्ग-कल्पनायाः हेतुरपि पुरुषार्थ एव। पुरषस्य भोगसिद्ध्यर्थं तस्यावश्यकत्वात्, यतः बुद्धेः भोग्य - भूतस्य पंचतन्मात्रादिजातस्य तत्त्वस्य आवश्यकता भवत्येव। अतः पुरुषेण समं लिंगशरीरस्य स्थित्यै भूतसर्गस्य भौतिकशरीरस्य वा आवश्यकता अनिवार्यरूपेण अवलोक्यते। भौतिकसर्गेऽयं चराचरभेदेन द्विविधः भवति। पनश्च चरात्मकः सर्गः जरायुज अण्डज -स्वेदज - उद्भिज्जभेदेन चतुर्विधः। तत्र जरायुजं मनुष्य पश्वादिरूपम्, अण्डजं शकुनि-सरीसृपादिकम्, स्वेदजानि यूकालाक्षादीनि, उद्भिज्जानि कृमि - वृक्षादीनि च। तत्र अचरं स्थावरं पृथिव्यादिः मृत्पाषाणादिश्च।

दैव-तिर्यक्-मानुषभेदेन भौतिकसर्गः त्रिविधः उच्यते। तत्र दैवसृष्टिः अष्टविधा, ब्राह्म-प्राजापत्य-ऐन्द्र-पैत्र-गान्धर्व-याक्षराक्षस- पैशाचभेदेन। मानुषसृष्टिस्तु एकविधा एव। तिर्यक् सृष्टिः पंचविधा, पशु-मृग- पक्षी - सरीसृप स्थावरभेदेन। अत्र पशुमृगयोः भेदं वर्तते, - पशवः सखुराः चतुष्पदाः, मृगानि अखुरानि विविधपदानि। इत्थमष्टविकल्पात्मकोऽयं भौतिक- सर्गः-

अष्टविकल्पो देवस्तैर्यग्योनयश्च पञ्चधा भवति।
मानुषश्चैकविध, समासतो भौतिकः सर्गः।।

इत्थं त्रिविधसर्गेषु अष्टविधाः दैवसृष्ट्यन्तर्भूताःब्राह्मप्राजापत्यादयः सत्त्व-गुणप्राधान्यत्वात् भूलोकादुपर्युपरि सन्तिष्ठन्ते। तैर्यग्सृष्ट्यन्तर्भूताः पशुपक्षिस्थावरादयः भूलोकादधोगमनप्रवृत्तिशालिनः अधोऽधः निवासिनः वा भवन्ति। मानुष - सृष्टिगताः मानवाः रजो बाहुल्यात् तिर्यग्गमन प्रवृत्तिशालिनः प्रेरकाश्च भवन्ति।।

## 15. सांख्यकारिकोक्तरीत्या मोक्षस्वरूपं (अपवर्गः) निरूपयता

आध्यात्मिकाधिदैविकाधिभौतिकेभ्यः त्रिविधदुःखेभ्यः निवृत्तिरेव मोक्ष। इयं दुःखनिवृत्तिः विवेकज्ञानाद् एव भवति। अतः प्रकृतिपुरुषयोः विवेकज्ञानादेव सुख-दुख-मोहान् प्रकृतिप्रदत्तान् भोगान् वा अनुभवन् जीवः बन्धनात् मुच्यते। इत्थं विवेकज्ञानमेव अपवर्गः। अर्थात् पुरुषस्तु स्वभावादेव निर्लिप्तः, तथापि बुद्धिप्रतिबिम्बिततत्वात् बुद्धेः सुखादिधर्मान् स्वकीयानिव अनुभवन् बन्धनम् अनुभवति। विवेकज्ञानात् तस्यैव यथार्थबोधः।

प्रसवधर्मा त्रिगुणात्मिका प्रकृतिः स्वभावादेव पुरुषस्य भोगान् सम्पादयति। पुरुषश्च तान् भोगान् स्वकीयान् इति मत्वा गृह्णाति। एवं प्रकृतेः नित्यपरिणामित्वात् मोक्षः न सम्भवति, अतः एतस्यैव समस्यायाः निराकरणाय आह श्रीमदीश्वरकृष्णः-

रंगस्य दर्शयित्वा निवर्तते नर्तकी यथा नृत्यात्।
पुरुषस्य तथात्मानं प्रकाश्य विनिवर्तते प्रकृतिः।।

अर्थात्, नर्तकी यथा रंगशालायाम् आत्मानं प्रकाश्य, नृत्यं दर्शयित्वा वा नृत्यकर्मात् निवर्तते, तथैव प्रकृतिरपि पुरुषाय विविधान् भोगापवर्गान् उपस्थाय भोगसम्पादनात् निवर्तते। अर्थात् ज्ञानेन स्वकीयं सप्तस्वरूपात्मकम् अज्ञानधर्माधर्मवैराग्यावैराग्यैश्वयानै श्वयात्मकम् स्वरूपम् दर्शयित्वा आत्मानं मोचयति इति भावः,-

रूपैः सप्तभिरेव तु बध्नात्यात्मानमात्माना प्रकृतिः।
सै च पुरुषार्थं प्रति विमोचयत्येकरूपेण।।

अर्थात्, यदा मुमुक्षु-पुरुषः व्यक्ताव्यक्तज्ञानां पृथक्-पृथक् ज्ञानं गृह्णाति, तदा साः, इमे सुख-दुःखादयो नास्माकम्, अहं नित्यः चेतनः द्रष्टा चास्मि, इत्यादिकं मत्वा तेभ्यो निरपक्षो जायते। तदा प्रकृतिः तं प्रति स्वयमेव निवृत्ता भवति, इत्यर्थः। एवं पुरुषस्य भोगसम्पादनात् निवृत्ता प्रकृतिः नर्तकीवद् पुनः औत्सुक्यात् पर्यवत्स्यति इति चेत् न-

प्रकृतेः सुकुमारतरं न किञ्चिदस्तीति मे मतिर्भवति।
या दृष्टाऽस्मीति पुनर्न दर्शनमुपैति पुरुषस्य।।

इत्थं सुस्पष्टं यत् सम्यग्ज्ञानाधिगमात् प्रकृति-पुरुषयोः पृथक् - पृथक् प्रकाशनानन्तरं सुखदिभ्यः कर्मादिभ्यश्च निर्लिप्तः सन् मुमुक्षुः स्वात्मानं नित्यशुद्धबुद्धत्वेन अवधारयति। तच्च सम्यग्बोधः गुरुकृपया वेदशास्त्रादीनां सततमभ्यासवशाच्च भवति। अतः मोक्षे जिज्ञासा, गुरुकृपा, वेदादीनामध्ययनं च सम्मिलितरूपेण कारणतां यान्ति। एवंभूतैः कारणैः अधिगतः अपवर्गः अहं-ममादिवासना-रहितः भवति, यथोक्तं श्रीमदीश्वरकृष्णेन सांख्यकारिकायाम्-

एवं तत्वाभ्यासान्नास्मि न मे नाहमित्यपरिशेषम्।
अविपर्ययाद् विशुद्धं केवलमुत्पद्यते ज्ञानम्।।

एवं ज्ञाने सति पुरुषः प्रकृतिं प्रकृतिधर्मान् च तटस्थत्वेन पश्यति, यथोक्तम्-

तेन निवृत्तप्रसवामर्थवशात् सप्तरूपविनिवृत्ताम्।
प्रकृतिं पश्यति पुरुषः प्रेक्षकवदवस्थितः स्वच्छः।।
दृष्टा मयेत्युपेक्षक एको दृष्टाऽहमित्युपरमत्यन्या।
सति संयोगेऽपि तयोः प्रयोजनं नास्ति सर्गस्य।।

यतः प्रथममेवोक्तं श्रीमता ईश्वरकृष्णेन 'प्राकृतेः सुकुमारतरं न किञ्चिद् अस्ति'। अतः प्रकृति पुरुषसंयोगेऽपि परस्परनिरपेक्षत्वात् न पुनः सर्गारम्भः। तथापि प्रारब्धः कर्मपरिपाकौ धर्माधर्मौ संस्कारौ च भोगेन एव क्षेतव्यौ। अतः कुलालचक्रवत् प्रारब्धकर्मक्षयपर्यन्तं स पुरुषः शरीरं धारयत्येव पुनश्च शरीर-विनाशे दुःखत्रयनिराशः ऐकान्तिकात्यन्तिक दुःखनिवृत्तिः वा भवत्येव। अयमेव मोक्षः।।

# MODULE - II

# वेदान्तसारः

**1. वेदान्तसारस्य मङ्गलश्लोकः।**

चिकीर्षितस्य ग्रन्थस्य निर्विघ्नपरिसमात्तिं अद्दिश्य आयार्य सदानन्दयतीश्वरः स्वस्य वेदान्तसार नामक ग्रन्थे मङ्गलाचरणं कृतम्।

अखण्डंसच्चिदानन्दमवाङ्मनसगोचरम्।
आत्मानमखिलधारमाश्रयेऽभीष्टसिद्धये।।

अहं (सदानन्दः) अभीष्टसिद्धये अखण्डम् सच्चिदानन्दम्, अवाङ्मनसगोचरम् अखिलाधारम् आत्मानम् आश्रये।

**2. को नाम वेदान्तः?**

वेदान्तो नाम उनिषत्प्रमाणं, तदुपकारीणि शारीरकसूत्रादीनि च।

**3. अनुबन्धचतुष्टयं निरूपयत।**

अनुबध्नन्ति अध्येतारम् इति अनुबन्धानि। यथा, केन पठितव्योऽयं ग्रन्थः? अस्य विषयः कः? अनेन प्रतिपाद्यविषयेण सह ग्रन्थस्यास्य कः सम्बन्धः? तथा अस्याध्ययनस्य प्रयोजनं किम्? एतदेवानुबन्धम्। अधिकारि-विषय-सम्बन्ध-प्रयोजनानि अनुबन्धानि। एतेषां संक्षिप्तविवरणमत्र प्रस्तूयते।

**अनुबन्धो नाम अधिकारि - विषय सम्बन्ध- प्रयोजनानि।**

अधिकारि तु विधिदधीतवेदवेदाङ्गत्वेनापाततोऽधिगताखिलवेदार्थोऽस्मिन्जन्मानिजन्मान्तरे वा काम्यनिषिद्ध वर्जन पुरःस्सरं नित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेन निर्गतनिखिलकल्मषतया नितान्तनिर्मलस्वान्तः साधनचतुष्टय सम्पन्नः प्रमाता।

**काम्यानि** स्वगादीष्टसाधनानि ज्योतिष्टोमादीनि, **निषिद्धानि** नरकाद्यनिष्टसाधनानि ब्राह्मणहननादीनि। **नित्यानि** अकरणे प्रत्यवायसाधनानि सन्ध्यावन्दनादीनि। **नैमित्तिकानि** पुत्रजन्माद्यनुबन्धीति जातेष्ट्यादीनि। **प्रायश्चित्तानि** पापक्षयसाधनानि चान्द्रायणादिनि। **उपासनानि** सगुणब्रह्मविषयमानसव्यापाररूपाणि शाण्डिल्यविद्यादीनि।

एतेषां नित्यकर्मादीनां बुद्धिशुद्धिः परं प्रयोजनं, उपासनानां च चित्तैकाग्र्यमेव प्रयोनम्। नित्यनैमित्तिकप्रायश्चित्तोपासनादीनां तु अवान्तरफलं पितृलोक सत्यलोक प्राप्ति।

**3. A. साधनचतुष्टयनिरूपणाम्**

साधनचतुष्टयसम्पन्नः प्रमाता एव वेदान्त शास्त्रस्याधिकारि। तत्र साधनानि - **नित्यानित्यवस्तुविवेकः-**

**इहामुत्रार्थफलभोग विरागः- शमादिषट्क-सम्पात्तिः-मुमुक्षुत्वादिनि।**

**नित्यानित्यवस्तुविवेकस्तावत्** - बह्मेवनित्यं वस्तुः, ततोऽन्यदखिलमनित्यमिति विवेचनम्। ऐहिकानां स्रक्चन्दनवनितादि विषयभोगानां कर्मजन्यतया अनित्यत्वात् आमुष्मिकाणामपि अमृतादिविषय भोगानां अनित्यतया तेभ्यो नितरां विरतिः, **इहामुत्रार्थफलभोगविरागः**।

**शमादयस्तु - शम-दम-उपरति-तितिक्षासमाधान-श्रद्धाख्याः। शमः** तावत् श्रवणादिव्यतिरिक्तविषयेभ्यो मनसो निग्रहः। **दमः** बाह्येन्द्रियाणां तद्व्यतिरिक्तविषयेभ्यो निवर्तनम्। निवर्तितानामेतेषां तद्व्यतिरिक्त विषयेभ्यः उपरमणं **उपरतिः**, अथवा विहितानां कर्मणां विधिना परित्यागः। **तितिक्षा** - शीतोष्णद्वन्द्वसहिष्णुता। निगृहीतस्य मनसः श्रवणादौ तदनुगुणविषये च समाधिः **समाधानम्**।

गुरूपदिष्ट वेदान्तवाक्येषु विश्वासः **श्रद्धा**। **मुमुक्षुत्वं** मोक्षेच्छा। एवं भूतः प्रमाता एव अधिकारिरित्युच्यते।

**विषयः** जीवब्रह्मैक्यं शुद्धचैतन्यं प्रमेयं, तत्रैव वेदान्तानां तात्पर्यम्।

**सम्बन्धस्तु**-ब्राह्मात्मैक्यस्वरूपस्य प्रमेयस्य, ब्रह्मात्मैक्य प्रातिपादकोपनिषत्प्रमाणस्य च बोध्यबोधकभावलक्षणः। **प्रयोजनन्तु** - ब्रह्मात्मैक्यरूपप्रमेयगताज्ञानतत्कार्यसकलप्रपञ्चनिवृत्तिः। 'ब्रह्मवित् ब्रह्मैव भवति' इत्यादि श्रुतेः।

अयमधिकारी जननमरणसंसारानलसन्तप्तः प्रदीप्तशिरा जलराशिमिवोपहारपाणिः श्रोत्रियं ब्रह्मनिष्ठं गुरुमुपसृत्य तमनुसरति। सः आचार्यः परमकृपया अध्यारोपापवादन्यायेन शिष्यं अदिशति। एवं अनुबन्धचतुष्टयो निरूपितः।

## 4. अज्ञानस्वरूपम्

अज्ञानं तु सदसद्भ्यं अनिर्वचनीयं, त्रिगुणात्मकं, ज्ञानविरोधि, भावरूपं यत्किञ्चित् इति वदन्ति। अहं अज्ञः इत्याद्यनुभवात्, 'देवात्मशक्तिं स्वगुणैर्निगूढाम्' इत्यदि श्रुतेः च अज्ञानसिद्धिः।

## 4. A. अज्ञानस्य भेदद्वयम्। (ईश्वरस्वरूपम्)

अज्ञानं, समाष्टि-व्यष्टयभिप्रायेण एकं - अनेकं इति व्यवह्रियते। यथा वृक्षाणां समष्ट्यभिप्रायेण वनमित्येक्त्वव्यपदेशः, यथावा जलानां समष्ट्यभिप्रायेण जलाशयमिति व्यपदेशः तथा नानात्वेन प्रतिभासमानानां जीवगताज्ञानानां समष्ट्यभिप्रायेण एकत्वव्यपदेशः। इयं समष्टिः उत्कृष्टोपाधितया विशुद्धासत्वाप्रधाना। एतत् समष्ट्युपहिदं चैतन्यं सर्वज्ञत्व - सर्वेश्वरत्व - सर्वनियन्तृत्वादि गुणकं अव्यक्तमन्तर्यामी जगात्कारणमीश्वरः इति व्यपदिश्यते। सकलाज्ञानावभासकत्वात् च। "यः सर्वशः सः सर्ववित्" इति श्रुतेः।

ईश्वरस्य इयं समष्टिः अखिलकारणत्वात् कारणशरिरं, आनन्दप्रचुरत्वात्, कोशवदाच्छादकत्वात् च आनन्दमय कोशः, सर्वोपरमत्वात् सुषुप्तिः, अतः एव स्थूलसूक्ष्मप्रपञ्चलयस्थानां इति चोच्यते। यथा वनस्य व्यष्ट्यभिप्रायेण वृक्षाः, इत्यनेकत्व व्यपदेशः तथा अज्ञानस्य व्यष्ट्यभिाप्रायेण अनेकत्वव्यपदेशः। एतत् व्यष्ट्युपहितं चैतन्यं अल्पज्ञत्व-अनीश्वरत्वादि गुणकं प्राज्ञः इत्युच्यते, सकलाज्ञानावमासकत्वात्।

## 4. B. तुरीयचैतन्यस्वरूपम्

वनवृक्ष तदवच्छिन्नाकाशयोः, जलाशय जलतद्गतप्रतिबिम्बाकाशयोः वा आधारभूतानुपहिताकाशवत्ः अज्ञानतगुपहितचैतन्ययोः आधारभूतं अनुपहितं चेतन्यं ततु तरीयचैतन्यमित्युच्यते। "शिवमद्वैतं चतुर्थं मन्यते" इत्यादि श्रुतेः।

## 4. C. अज्ञानस्य शक्तिद्वयम्

अज्ञानस्य आवरणविक्षेपनामकमस्ति शक्तिद्वयम्। सच्चिदानन्दस्वरूपं आवृणोति इति **आवरणशक्तिः**। यथा स्वल्पोऽपि मेघः नेत्रसमक्षमागत्य अनेक योजनविस्तीर्णमपि सूर्यमण्डलमवलोकयितृ नयनपथपिथायकतया अच्छादयति, तथा अति तुच्छं परिच्छिन्नमपि अज्ञानं प्रमातृ बुद्धिमात्राच्छादकत्वेन आत्मानं अच्छादयति इति उपचारादुच्यते। वस्तुतस्तु नित्योपलब्धिस्वरूपोऽयमात्मा केनापि कथमपि पिधातुं न शक्यः। यथोक्तं हस्तामलकीये-

घनच्छन्नदृष्टिर्घनच्छन्नमर्कं
यथा मन्यते निष्प्रभञ्चातिमूढः।
तथा बद्धवद्भाति यो मूढदृष्टेः
सनित्योपलब्धि स्वरूपोऽयमात्मा।। इति।

अतिमूढः घनच्छन्नवृष्टिः सन् अर्कं घनच्छन्नं निष्प्रभं मन्यते तथा मूढदृष्टेः यः आत्मा बद्धवत् भाति, सः नित्योपलब्धिस्वरूपः एव आत्मा इति।

अनया एव आवरणशक्त्या समायुक्तः आत्मा सांसारिकविषयेषु कर्तृत्वभोक्तृत्वं सुखःदुःखित्वञ्च अनुभूयते। किन्तु सर्वमिदं रज्जु - सर्पभावेन मिथ्या वर्तने।

**विक्षेपशक्तिस्तु** अखिलब्रह्माण्डसमुत्पादिका अस्ति। आवरणशक्तिः यथा रज्जु स्वरूपं आवृणोति तथा विक्षेपशक्तिः आवृते रज्जौ सर्पादिकं उत्पादयति। तथैव आत्मविषयकं अज्ञानमपि बोध्यम्। अर्थात् आवरणशक्तिः तथा आत्मानम् आवृणोति तथा विक्षेपशक्तिः अत्मानि अकाशदि प्रपञ्चं उत्पादयति।

एवं शक्तिद्वयवदज्ञानोपहितं चैतन्यं स्वप्रधानत्या प्रपञ्चस्य निमित्तं स्वोपाधिप्रधानतया प्रपञ्चस्य उपादानकारणञ्च भवति। यथा लूता तन्तुकार्यं प्रति स्वप्रधानतया निमित्तं स्वशरीरप्रधानतया उपादानं च भवति।

## 5. अध्यारोप - अपवाद स्वरूपम्।

असर्पभूतायां रज्जौ सर्पारोपवत् वस्तुनि अवस्त्वारोपः **अध्यारोपः**। वस्तु सच्चिदानन्तानन्दाद्वयं ब्रह्म, अज्ञानादि सकल जडसमूहो अवस्तुः। अतः ब्रह्मणि प्रपञ्चस्यारोपः अध्यारोपः इत्युच्यते। अतः एव उच्यते अतस्मिन् तत् बुद्धिः अध्यारोपः इति। नित्यशुद्धबुद्धमुक्तब्रह्मतत्वे नानारूपात्मकस्य अनित्यस्य जगतः आरोपो अध्यारोपः इत्युत्यते। तत् त् केवलाज्ञानविजृम्भितमेव। **अपवादः**- अपवादोनाम रज्जुनिवर्तस्य सर्पस्य रज्जुमात्रत्ववत् वस्तुविवर्तस्य

अवस्तुनो अज्ञानादेः प्रपञ्चस्य वस्तुमात्रत्वम्। तदुक्तम्-

सतत्वतोन्यथा प्रथाविकारःइत्युदीरितः।

अतत्वतोऽन्यथा प्रथाविवर्तः इत्युदीरितः।

अपवादोनाम कार्यस्य कारणमात्रावशेषत्वम्। एवं यथार्थरूपेणावस्थितेवस्तुनि मिथ्याप्रतीतिरूपान्यथाभावे द्विधा भवाति - परिणामभावः, विवर्तभावश्च। परिणामो नाम स्वकीयं यथार्थरूपं परित्यज्य स्वरूपान्तरासात्तिः, यथा दुग्धस्य दधिरूपासत्तिः। विवतौनाम वस्तुनः स्वरूपाऽपरित्यागेन वस्त्वन्तरमिथ्याप्रतीतिः। यथारज्जौ सर्पप्रतीतिः।

## 6. सृष्टिक्रमः

तमः प्रधान विक्षेपशक्तिमदज्ञानोपहितचैतन्यात् आकाशः संभूतः। आकाशात् वायुः, वायोरग्निः, अग्नेरापः, अद्भयः पृथिवी चेत्पद्यन्ते। "तस्माद्वा एतस्मादात्मनः आकाशः संभूतः" इत्यादि श्रुतेः।

## 7. वेदान्तसाररीत्या सूक्ष्मशरीर (लिङ्गशरीर) उत्पत्तिः।

सूक्ष्मशरीराणि सप्तदशावयवानि लिङ्गशरीराणि। अवयवास्तु ज्ञानेन्द्रियपञ्चकं बुद्धिमनसी कर्मेन्द्रियपञ्चकं वायुपञ्चकं चेति।।

सूक्ष्मशरीरेषु सप्तदश अवयवाः भवन्ति। सूक्ष्मशरीरामेव लिंगशरीरंइत्युच्यते। सप्तदशा अवयवास्तु श्रोत्र - त्वक् - चक्षु- जिह्वा-घ्राणा-वाक् प्राणि-पाद-पायूपस्थानि इन्द्रियाणि मनोबुद्धियुताः पंचवायवः प्राणापानव्यानेदानसमानाः सन्ति। इमानि सप्तदश अवयवान्येव सप्तदश लिङ्गानि सन्ति। लिंग्यन्ते ज्ञाप्यन्ते प्रत्यगात्मसद्भाव एभिरिति लिंगानि। तानि लिङ्गान्येव लिङ्गशरीराणि। यथोक्तं, शतपथब्राह्मणो "मुख्यं तु सप्तदशकं प्रथितं हि लिङ्गम्"।।

अत्र ज्ञानेन्द्रियाणि तु ज्ञानसाधनानि इन्द्रियाण्येव, तानि च कर्ण-त्वक् - नेत्र- जिह्वा - घ्राणाख्यानि सन्ति। एभ्यः कर्णादिभ्यः शब्दादीनां ग्रहणं भवति। यथा, श्रोत्रग्राह्यो गुणो शब्दः। त्वगिन्द्रिय-मात्रग्राह्यो गुणो स्पर्शः। नेत्रमात्रग्राह्यो गुणो गन्धः एतेषां आकाशदीनां सात्त्विकांशात् कर्णस्य, वायवीयसात्त्विकांशात् त्वचः, तैजससात्त्विकांशात् नेत्रस्य, जलीयसात्त्विकांशात् रसनायाः, पार्थिवसात्त्विकांशात् घ्राणस्य च उत्पत्तिः, इत्यभिप्रायः।

बुद्धिर्नाम इदमित्थमेवेति निश्चयात्मिकान्तःकरणावृत्तिः, यथा-ब्राह्मैवाहमिति। इदमित्थं न वा इति संकल्पविकल्पात्मिकाऽन्तः- करणावृत्तिर्मनः, यथा - अहं चेतनस्वरूपं शरीरं वा। संकल्पस्तु इदं नीलमिदं पीतम् इति विषयविवेचनम्, विकल्पस्तद्विपर्ययः। अनयोः बुद्धिमनसेः एव चित्ताहंकारयोः अन्तर्भावः। अर्थात्, बुद्धौ चित्तस्य, मनसि अहंकारस्य च अन्तर्भावः इत्यर्थः। चित्तं तु अनुसन्धानात्मिकाऽन्तःकरणवृत्तिः। अहंकारस्तु अभिमानात्मिकाऽन्तः करणावृत्तिः। एतेषां मनोबुद्धिचित्ताहंकाराणां चतुर्णाम् एकम् मिलितमन्तःकरणं नाम। एतान्यपि चत्वारि आकाशादिगतसात्त्विकांशेभ्यो मिलितेभ्यः उत्पद्यन्ते। एते मनोबुद्धिचित्ताहंकाराः प्रकाशात्मकाः महाभूतसात्त्विकांशकार्यत्वे प्रमाणम्। ज्ञानेन्द्रियसहितबुद्धिः विज्ञानमयकोशः इत्युच्यते। विज्ञानमयकोशयुक्तं चैतन्यं कर्तृत्व-भोक्तृत्वाद्यभिमानित्वेन

स्वर्गादिलोकान्तरगामि भवति। व्यवहारदशायां च एतदेव विज्ञानमयकोशयुतं चैतन्यं जीव इत्युच्यते। श्रोत्रादिज्ञानेन्द्रियसहितं मनो मनोमयकोशः इत्युच्यते। संकल्प विकल्पात्मकत्वाद् बुद्ध्याद्यपेक्षयाऽधिक - जडत्वाच्च अस्मिन् रजोविकारेच्छारूपित्वेन एष व्यवहारः। आत्मनः कोशवदाच्छादकत्वादस्मिन् कोशत्वव्यवहारः।।

कर्मसाधनानि इन्द्रियाणि कर्मेन्द्रियाणि, वाक् - पाणि - पाद-पायु-उपस्थाख्यानि। वचनादानगमनविसर्गानन्दसाधनेन्द्रियत्वं यथाक्रमं वागादीनां प्रत्येकं लक्षणम्। एतानि कर्मेन्द्रियाणि आकाशदिरजोगुणांशेभ्यः क्रमशः पृथक् - पृथक् उत्पद्यन्ते। अर्थात्, रजोगुणप्रधानाकाशाद् वागिन्द्रियम्, रजोगुणप्रधानवायोः पाणीन्द्रियम्, रजोगुण-प्रधानाग्नेः पादेन्द्रियम्, रजोगुणप्रधानजलात् मलविसर्जनेन्द्रियम् (पायुः), रजोगुणप्रधानपृथिव्याः उपस्थेन्द्रियम् च उत्पद्यते।

वायु-पंचकस्तु प्राणापानव्यानेदानसमानसंज्ञकाः सन्ति। तत्र प्राणो नाम वायुः ऊर्ध्वगमनशीलः नासाग्रस्थायी च भवति। अपानो नाम अधोगमनशीलः पाय्वादिस्थायी वायुः। उदानो नाम ऊर्ध्वदेशम् उत्क्रमणशीलः कण्ठस्थायी वायुः। समानो नाम शारीरमध्यगतान्नरसादिनेता वायुः। अशितादेः समनयनात् समानः। सांख्यामतानुयायिनः क्रियाभेदेन अन्येऽपि पञ्चवायवः स्वीकुर्वन्ति। यथोक्तम्-

उद्गारे नाग आख्यातः, कूर्म अन्मीलने स्मृतः।<br>
कृकलः क्षुत्करो ज्ञेयो, देवदत्तो विजृम्भणे।।<br>
न जहाति मृतं चापि, सर्वव्यापी धनञ्जयः।

अर्थात्, नाग-कूर्म-कृकल-देवदत्त-धनञ्जयाख्याः अन्येऽपि पञ्चवायवः भवन्ति। तत्र उद्गिरणे छर्दिक्रियायां नागः। चक्ष्वोः अन्मीलन-निमीलनयोः कूर्मः। क्षुत्करणे क्षुधा-पिपासयोः कृकलः। निद्राऽऽलस्यादिहेतुकत्वात् जृम्भणे देवदत्तः। पोषणे रस-लोहित-मांसादिक्रमेण शरीरेऽन्नपरिणामे धनञ्जयः। परम् एतेषां नागादीनां प्राणादिष्वेव अन्तर्भावं स्वीकुर्वन्ति वेदान्तिनः। यथा - नागस्य उदाने, कूर्मस्य व्याने, कृकलस्य समाने, देवदत्तस्य अपाने, धनंजयस्य समाने चान्तर्भावः। अतः वायवस्तु प्राणादिकाः पञ्चैव। इमाः पञ्चवायवः रजः प्रधानेभ्यः अपञ्चीकृतपंचभूतेभ्यः मिलितेभ्यः अंशेभ्यः समुद्भवन्ति। कर्मेन्द्रियसहितं तत् प्राणादिपंचकं प्राणमयकोशः इत्युच्यते। एतच्च क्रियात्मकमिति रजोगुणांशकार्यत्वम्। एतेषु त्रिषु पूर्वोक्त - विज्ञानमय-मनोमय- प्राणमयकोशेषु विज्ञानमयकोशःज्ञानशक्तिसम्पन्नः कर्ता इति उच्यते, मनोमयकोशः इच्छाशक्तिसम्पन्नः करणम् इत्युच्यते, प्राणमयकोशञ्च गामनादिक्रियासम्पन्नः कार्यमित्युच्यते। एवं कार्यसम्पादन क्षमतानुसारमेव कर्तृकरणकार्येति विभागत्रयं कथयन्ति शास्त्रकाराः। एतत्कोशत्रयमेव सम्मिलितरूपेण सूक्ष्मशरीरम् इत्युच्यते।।

## 8. पंचीकरणम्

पंचीकरण - प्रक्रियाम् आकाशदिषु, पंचमहाभूतेषु एकैकं समं विभज्य तेषु दशसु भागेषु प्राथमिकान् पञ्चभागान् चतुर्धा समं विभज्य प्रत्येकमहाभूतस्य पञ्च - पञ्च भागः कृताः। अर्थात्, प्रत्येकमहाभूतस्य एकः

अर्धभागः चत्वारश्च अष्टमांशभागाः कृताः। अस्यां दशायां प्रत्येक महाभूतस्य चत्वारः अष्टमांशभागाः स्व-स्व-द्वितीयार्धभाग परित्यागेन अन्यमहाभूतानां चतुर्षु अर्धभागेषु एकैकं संयोजिताः। एवं प्रत्येकमहाभूतस्य अन्येषां चतुर्णां महाभूतानाम् अष्टमांशविशिष्ट - स्वकीयार्धांशतया पंचमहाभूत-विशिष्टं सञ्जायते। अयमेवविधिः पंचीकरणस्य यथोक्तं पंचदशीकारेण विद्यारण्येन-

द्विधा विधाय चैकेकं चतुर्धा प्रथमं पुनः।
स्व-स्वेतरद्वितीयांशैर्योजनात् पञ्च पंच ते।। (पंचदशी ।। 1/27।।)

आकाशदिनां पंचानां महाभूतानां पंचात्मकत्वे समानेऽपि स्व-स्वार्ध-भागानाम् आधिक्येन वर्तमानात् आकाशादि व्यवहारोपपत्तिः। एवं पंचीकृताकाशे शब्दः, पंचीकृतवायौ शब्दस्पर्शो, पंचीकृततेजसि शब्द-स्पर्श-रूपाणि, पंचीकृत-जले शब्द-स्पर्श-रूप-रसाः, पंचीकृतपृथिव्यां च शब्द-स्पर्श-रूप- रस-गन्धाः, उत्तरोत्तरं स्व - स्वकारणानुरूपं सुस्पष्टतया प्रतीयन्ते।।

## 9. स्थूलप्रपञ्चोत्पत्तिः संक्षेपेण निरूपयत।

पञ्चीकृतेभ्यः आकाशादिपंचभूतेभ्यः चतुर्दशभुवनानाम् उत्पत्तिर्भवति। इमानि भुवनानि, भूः, भुवः, स्वः, महः, जनः, तपः, सत्यम् इति उपर्युपरि वर्तमानाः लोकाः, अतलं, वितलं, सुतलं, तलालतं, रसातलं, महातलं पातालमिति अधो-अधो वर्तमानाः लोकाः च उत्पद्यन्ते। एतेषां लोकानां समाहारः ब्रह्माण्डम् इत्युत्यते। पंचीकृतपंचभूतेभ्यः समुत्पन्ने ब्रह्माण्डेऽस्मिन् चतुर्विधस्थूलशरीराणाम् जरायुज-अण्डज-उद्भिज्ज-स्वेदजानां तद्योग्यान्नपानादीनां च उत्पत्तिर्भवति। तत्र गर्भस्थजरायुभ्यो जातानि मनुष्यपश्वादीनि जरायुजानि। अण्डेभ्यः उत्पन्नानि शकुनिसर्पादीनि अण्डजानि। भूमिम् उद्भिद्य विदीर्य वा समुत्पन्नानि लता-वृक्षादीनि उद्भिज्जानि। स्वेदेभ्यः समुत्पन्नानि यूकामशकादीनि स्वेदजानि इत्यभिप्रायः।।

## 10. वेदान्तसारमनुसृत्य महाप्रपञ्चं संक्षेपेण निरूपयत।

यथा पलाशादिवृक्षाणाम् अवान्तरवनानां समष्टिः एकं महद्वनं भवति, यथा वापी-कूप-तडागादीनाम् अवान्तरजलाशयानां समष्टिः एको महान् जलाशयो भवति, तथैव स्थूल-सूक्ष्म-कारणशरीराणाम् अवान्तरप्रपञ्चानां समष्टिः एको महाप्रपञ्चः भवति। तथा वनावच्छिन्नाकाशवृक्षावच्छिन्नाकाशयोर्यथा न कोऽपि भेदः, अथवा जलगतजलाशयगत-प्रतिविबिताकाशयोश्च यथा न कोऽपि भेदः, तथैव महाप्रपञ्चसमष्टि-व्यष्ट्योः तदुपहितचैतन्येश्वर-प्राज्ञयोः, हिरण्यगर्म-तैजसोः, वैश्वानर-विश्वयोश्च अभेद एव। एतेन महाप्रपञ्चेन तथा तदुपहितचैतन्येन च अभिन्नं सद् अनुपहितं चैतन्यं विशुद्धं चैतन्यं वा 'सर्वं खल्विदं ब्राह्म' इत्यस्य महावाक्यस्य वाच्यार्थस्तथा भिन्नं सत् पूर्वोक्तेन प्रपञ्चेन लक्ष्यार्थश्चेति।

## 11. पुत्रादीनां आत्मत्वप्रतिपादनं, निराकरणं च।

इदानीं प्रत्यगात्मनीदमिदमयमयमारोपयतीति विशेषत उच्यते। अतिप्राकृतास्तु "आत्मा वै जायते पुत्र"

इत्यादिश्रुतेः स्वस्मिन्निव स्वपुत्रेऽपि प्रेमदर्शनात्पुत्रे पुष्टे नष्टे चाहमेव पुष्टो नष्टश्चेत्याद्यनुभवाच्च पुत्र आत्मेति वदति। चार्वाकस्तु "स वा एष पुरुषोऽन्नरसमयः" इत्यादिश्रुतेः प्रदीप्तगृहात्स्वपुत्रं परित्यज्यापि स्वस्य निर्गमदर्शनात्स्थूलोऽहं कृशोऽहमित्याद्यनुभवाच्च स्थूलशरीरमात्मेति वदति। अपरश्चार्वाकः "ते ह प्राणाः प्राजापतिं पितरमेत्य ब्रूयुः" इत्यादिश्रुतेरिन्द्रियाणामभावे शरीरचलनाभावात्काणोऽहं बधिरोऽहमित्याद्यनुभवाच्चेन्द्रियाण्यात्मेति वदति। अपरश्चार्वाकः "अन्योऽन्तर आत्मा प्राणामयः" इत्यादिश्रुतेः प्राणाभावे इन्द्रियादिचलनायोगादहमशनावानहं पिपासावानित्याद्यनुभवाच्च प्राणा आत्मेति वदति। अन्यस्तु चार्वाकः "अन्योऽन्तर आत्मा मनोमयः' इत्यादिश्रुतेर्मनसि सुप्ते प्राणादेरभावादहं संकल्पवानहं विकल्पवानित्याद्यनुभवाच्च मन आत्मनेति वदति। बौद्धस्तु "अन्योऽन्तर आत्मा विज्ञानमयः' इत्यादिश्रुतेः कर्तुरभावे करणस्य शक्त्यभावादहंकर्ताहंभोक्तेत्याद्यनुभवाच्च बुद्धिरात्मेति वदति। प्रभाकरतार्किकौ तु 'अन्योऽन्तर आत्मानन्दमय' इत्यादिश्रुतेर्बुद्धयादीनामज्ञाने लयदर्शनादहमज्ञोऽहमज्ञानोत्या-द्यनुभवाच्चाज्ञानमात्मेति वदतः। भाट्टस्तु "प्रज्ञानघनः एवानन्दमयः" इत्यादिश्रुतेः सुषुप्तौ प्रकाशाप्रकाशसद्भावान्मामहं न जानामीत्याद्यनुभवाच्चाज्ञानोपहित चैतन्यमात्मेति वदति। अपरो बौद्धः "असदेवेदमग्र आसीत्" इत्यादिश्रुतेः सुषुप्तौ सर्वाभावादहं सुषुप्तौनासमित्युस्थितस्य स्वाभावपरामर्शविषयानुभवाच्च शून्यमात्मेति वदति।।

**पंचीकरणसारणी**

| पंचीकृतानि स्थूलभूतानि | | | | | | प्राधान्येन वर्तमानाः |
|---|---|---|---|---|---|---|
| आकाशः | आकाशः 50% | वायुः 12.5% | अग्निः 12.5%: | जलम् 12.5% | पृथिवी 12.5% | शब्दमात्रम् |
| वायुः | वायु 50% | अग्निः 12.5% | जलम् 12.5% | पृथिवी 12.5% | आकाशः 12.5% | शब्द-स्पर्शो। |
| अग्निः | अग्निः 50%: | जलम् 12.5% | पृथिवी 12.5% | आकाशः 12.5% | वायुः 12.5% | शब्द-स्पर्श-रूपाणि |
| जलम् | जलम् 50% | पृथिवी 12.5% | आकाशः 12.5% | वायु 12.5% | अग्निः 12.5% | शब्द-स्पर्श-रूप-रसाः। |
| पृथिवी | पृथिवी 50 % | आकाशः 12.5% | वायुः 12.5% | अग्निः 12.5% | जलम् 12.5% | शब्द-स्पर्श-रूप-रस-गन्धाः। |

## 11. A. पुत्रादीनामनात्मत्वप्रतिपादनम्

एतेषां पुत्रादीनामनात्मत्वमुच्यते। एतैरतिप्राकृतादिवादिभिरुक्तेषु श्रुतियुक्त्यनुभवाभासेषु पूर्वपूर्वोक्तश्रुतियुक्त्यनुभवाभासानामुत्तरोत्तरश्रुतियुक्त्यनुभवाभासैरात्मत्वबाधर्शनात्पुत्रादीनामनात्मत्वं स्पष्टमेव। किञ्च प्रत्यगस्थूलोऽचक्षुरप्राणोऽमना अकर्ता चैतन्यं चिन्मात्रं सदित्यादिप्रबलश्रुतिविरोधादस्य पुत्रादिशून्यपर्यन्तस्य जडस्य चैतन्यभास्यत्वेन घटादिवदनित्यत्वादहब्रह्मेति विद्वदनुभवप्राबल्याच्च तत्तच्छतियुक्त्यनुभवाभासानां बाधितत्वादपि पुत्रादिशून्यपर्यन्तमखिलमनात्मैव। अतस्तत्तद्भासकः नित्युशुद्धबुद्धमुक्तसत्यस्वभावः प्रत्यक्चैतन्यमेवात्मवस्त्विति वेदान्तविद्वदनुभवः।

## 12. वेदान्तशास्त्रमनुसृत्य 'तत् - त्वम्' पदार्थशोधनम् निरूपयत।

अध्यारोपापवादाभ्यां जगत्स्वरूपं तत्कारणं ब्रह्मस्वरूपं च सम्यक्रूपेण निरूप्य, सम्प्रति आभ्याम् अध्यारोपापवादाभ्यां 'तत्त्वमसि' इति वाक्यान्तर्गतयोः तत्त्वम् - पदयोः परिशुद्धिरपि शोधयते। तथाहि, अज्ञानं तदवच्छिन्नेश्वरचैतन्यं तदनुपहित - चैतन्यम् च एतत्त्रयं तप्तायः पिण्डवद् एकत्वेन अवभासमानं सत् तत्-पदवाच्यार्थो भवति तथा अज्ञानावच्छिन्नेश्वरचैतन्यस्य आधारभूतं यद् अनुपहितचैतन्यं तत् पूर्वोक्तात् अज्ञानाद्यवच्छिन्नेश्वरादिचैतन्याद् भिन्नत्वेन प्रतिभासमानं तत्-पदस्य लक्ष्यार्थो भवतीत्यर्थः। एवमेव अज्ञानादिव्यष्टिः, तदविच्छन्नं प्राज्ञादिचैतन्यं, तदनुपहितं चैतन्यं च एतत् त्रयं तप्ताथः पिण्डवत् परस्परतादात्म्याध्यासेन अभेदविवक्षया त्वम् - पदस्य वाच्यार्थो भवति, तथा अज्ञानादिव्यष्टिः, तदवच्छिन्नप्रज्ञादिचैतन्यं। तदाधारभूतम् अनुपहितं प्रात्यगात्मतुरीयचैतन्यं च एत त्रयं भिन्नत्वेन अवभासमानं सत् त्वं-पदस्य सक्ष्यार्थो भवति। अर्थात्, एकमेव अनुपहितं विशुद्धचैतन्यं भिन्न-भिन्नावस्थायाम् उभयोः तत् - त्वम्पदयोः वाच्यार्थः लक्ष्यार्थश्च भवति।।

## 12. A. महावाक्यार्थः

अथ महावाक्यार्थो वर्ण्यते। इदं तत्त्वमसीतिवाक्यं सम्बन्धत्रयेणाखण्डार्थबोधकं भवति। **सम्बन्धत्रयं नाम पदयोः सामानाधिकरण्यं पदार्थयोर्विशेषणशेष्यभावः प्रत्यगात्मलक्षणयोर्लक्ष्यलक्षणभावश्चेति।** तदुक्तम्...

"सामानधिकरण्यं च विशेषणविशेष्यता।
लक्ष्यलक्षणसम्बन्धः पदार्थप्रत्यगात्मनाम्।।" इति।

सामानाधिकरण्यसम्बन्धस्तावद्यथा सोऽयं देवदत्तः इत्यस्मिन्वाक्ये तत्कालविशिष्टदेवदत्तवाचकसशब्दस्य एतत्कालवि-शिष्टदेवदत्तवाचकायंशब्दस्य चैकस्मिन्पिण्डे तात्पर्यसम्बन्धः। तथा च तत्वमसीतिवाक्येऽपि परोक्षत्वादिविशिष्टचैतन्यवाचकतत्पदस्यापरोक्षत्वादिविशिष्ट चैतन्यवाचकत्वम्पदस्य चैकस्मिंश्चैतन्ये तात्पर्यसम्बन्धः। विशेषणविशेष्यभावसम्बन्धस्तु यथा तत्रैव वाक्ये सशब्दार्थतत्कालविशिष्टदेवदत्तस्यायंशब्दार्थेतत्कालविशिष्टदेवदत्तस्य अन्योन्यभेदव्यावर्तकतया विशेषणविशेष्य भावः। तथात्रापि वाक्ये तत्पदार्थपरोक्षत्वादिविशिष्टचैतन्यस्य त्वम्पदार्थापरोक्षत्वादिविशिष्टचैतन्यस्य चान्योन्यभेदव्यावर्तकतया विशेषणविशेष्यभावः। लक्ष्यलक्षणसम्बन्धस्तु यथा तत्रैव वाक्ये सशब्दायंशब्दयोस्तदर्थयोर्वा विरुद्धतत्कालैतत्कालविशिष्टत्वपरित्यागेनाविरुद्धदेवदत्तेन सह लक्ष्यलक्षणभावः। तथात्रापि वाक्ये तत्त्वम्पदयोस्तदर्थयोर्वाविरुद्धपरोक्षत्वापरोक्षत्वादिविशिष्टत्वपरित्यादेन अविरुद्धचैतन्येन सह लक्ष्यलक्षणभावः। इयमेव भागलक्षणेत्युच्यते।।

## 12. B. विशेषण - विशेष्यभावनिरूपणम्

अस्मिन्वाक्ये नीलमुत्पलमिति वाक्यवद्वाक्यार्थो न सङ्गच्छते। तत्र तु नीलपदार्थनीलगुणस्यो-त्पलपदार्थोत्पलद्रव्यस्य च शौक्ल्यपटादिभेदव्यावर्तकतयान्योन्यविशेषणविशेष्यभावसंसर्गस्यन्तरविशिष्टस्यान्यतरस्य तदैक्यस्य वा

वाक्यार्थत्वाङ्गीकारे प्रमाणान्तरविशेधाभावात्तद्वाक्यार्थः सङ्गच्छते। अत्र तु तदर्थपरोक्षत्वादिविशिष्टचैतन्यस्य त्वमर्थापरोक्षत्वादिविशिष्टचैतन्यस्य चान्योन्यभेदव्यावर्तकतया विशेषणविशेष्यभावसंसर्गस्यान्यतरविशिष्टस्यान्यतरस्य तदैक्यस्य च वाक्यार्थत्वाङ्गीकारे प्रत्यक्षादिप्रमाणविरोधाद्वाक्यार्थो न सङ्गच्छते। तदुक्तम्

"संसर्गो वा विशिष्टो वा वाक्यार्थो नात्र सम्मतः।
अखण्डैकरसत्वेन वाक्यार्थो विदुषां मत" इति।।

## 12. C. वेदान्तसारमनुसृत्य तत्त्वम्पदयोः जहल्लक्षणां निरूपयत।

'**तत्त्वमसि**' इति वाक्ये जहल्लक्षणा न संगच्छते, इति प्रदर्शनार्थमेव जहल्लक्षणायाः उदाहरणां प्राह, अत्र गंगायां घोषः इति। मुख्यार्थबाधे वाच्यार्थमखिलं परित्यज्य तत्सम्बन्धिनि अर्थान्तरे वृत्तिर्लक्षणा। अर्थत्, जहल्लक्षणा तत्रैव भवितुं श्क्नोति यत्र मुख्यार्थबाधः, सुनिश्चितः। यथा 'गंगायां घोषः' इत्यस्मिन् उदाहरणे गंगा - शब्दस्यार्थः प्रवाहः तथा घोषस्य च आभीरपल्लीति। अनयोः गंगा - घोषयोः आधाराधेयभावो न सम्भवति, यतः गंगाप्रवाहे घोषवसनस्य सर्वथासम्भवात् मुख्यार्थबाधो भवत्येव। अतः जहल्लक्षणावृत्या 'गंगा' शब्दः प्रवाहरूपं स्वकीयम् अखिलमर्थं परित्यज्य तत्सम्बन्धितीररूपार्थान्तरं लक्षयति; किन्तु 'तत्त्वमसि' इत्यस्मिन् वाक्ये परोक्षापरोक्षचैतन्यैकत्वलक्षणस्य वाक्यार्थस्य न सर्वथा विरोधः, अपितु परोक्षापरोक्षत्वप्रतिपादकत्वरूपभाग-मात्रे विरोधः, चैतन्यैकत्वांशे च अविरोध, इति 'तत्' शब्दे, 'त्वं' शब्दे वा मुख्यार्थबाधासम्भवात् परोक्षत्वापरोक्षत्वप्रतिपादक विरुद्धांश- परित्यागेऽपि चैतन्यैकत्वरूपस्य अविरुद्धांशस्य तादवस्थ्यात् जहल्लक्षणावृत्या चैतन्यैकबोधः असम्भवः एव।

## 12. D. वेदान्तसारमनुसृत्य तत्त्वं-पदयोः अजहल्लक्षणां निरूपयत।

'**तत्त्वमसि**' इति वाक्ये अजहल्लक्षणाऽपि न सम्भवति, इति प्रदर्शयन् आह, अत्र शोणो धावतीति। 'शोणोधावति' इव तत्त्वमसि महावाक्ये अजहल्लक्षणायाः अपि सम्भावाना नास्ति। यतः 'वाच्यार्थस्य अपरित्यागेन तत्सम्बन्धिनि अर्थान्तरे वृत्तिः अजहल्लक्षणा'। शोणो धावति' इत्यस्मिन् वाक्ये शोणगुणस्य धावनासम्भवात् मुख्यार्थबाधे सति, तस्य शोणगुणस्य अपरित्यागेन तदाश्रये अश्वादौ लक्षणया मुख्यार्थविरोधो निवार्यते; किन्तु 'तत्त्वमसि' इति महावाक्ये तत्-पदस्य त्वमपद्स्य च परस्परं विरुद्धो यो वाच्यार्थः तमपरित्यज्य परोक्षत्वादिविशष्टचैतन्यबोधकेन तच्छब्देन, अपरोक्षत्वादिविशिष्टजीवचैतन्यस्य, अपरोक्षत्वादिविशिष्टचैतन्यबोधकेन त्वम् - शब्देन परोक्षत्वादिविशिष्टेश्वर चैतन्यस्य वा लक्षितत्वेऽपि परोक्षत्वाऽपरोक्षत्वादिलक्षण विरोधः सुस्थिरः एव। अतः अजहल्लक्षणाऽपि अत्र न सम्भवति।

## 12. E. वेदान्तसारमनुसृत्य जहदजहल्लक्षणां निरूपयत्।

'**तत्त्वमसि**' इति महावाक्ये जहदजहल्लक्षणा एव उपयुक्ता। यथा 'सोऽयं देवदत्तः' इति उदाहरणे तत् पदं तदर्थः वा तत्काल-तद्देशसम्बन्धविशिष्ट - एतत्कालैतद्देशविशिष्टरूपार्थयो सोऽयम्शब्दयोः देश-कालविरोधेऽपि

'देवदत्त' इति एकार्थस्य बोधनाय भागत्यागलक्षणा (भागलक्षणा) स्वीक्रियते। तथैव 'तत्त्वमसि' इति महावाक्येऽपि विरुद्धपरोक्षत्वाऽपरोक्षत्वाद्यंशं जहत् अविरुद्धचैतन्यांशं च अजहत् 'तत्त्वम्' इति पदद्वयं अखण्डचैतन्यमात्रम् लक्षयति। एतत्सर्वं न जहल्लक्षणया नापि अजहल्लक्षणया, अपितु भाग-लक्षणया (जहदजहल्लक्षणाया) सम्भाव्यमिति।।

## 12. F. अनुभववाक्यार्थः

अथाधुनाहं ब्रह्मास्मीत्यनुभववाक्यार्थो वर्ण्यते। एवमाचार्येणाध्यारोपापवादपुरःसरं तत्त्वम्पदार्थौ शोधयित्वा वाक्येना खण्डार्थेऽवबोधितेऽधिकारिणोऽहं नित्यशुद्धबुद्धमुक्तसत्यस्वभावापरमानन्दानन्ताद्वयं ब्रह्मास्मीत्यखण्डाकाराकारिता चित्तवृत्तिरूदेति। सा तु चित्प्रतिबिम्बसहिता सती प्रत्यगभिन्नमज्ञातं परंब्रह्म विषयीकृत्य तद्‌गताज्ञानमेव बाधते। तगा पटकारणतन्तुदाहे पटदाहवदखिलकारणेऽज्ञाने बाधिते सति तत्कार्यस्याखिलस्य बाधितत्वात्तदन्तर्भूताखण्टाकारकारिता चित्तवृत्तिरपि बाधिता भवति। तत्र प्रतिबिम्बितं चैतन्यमपि यथा दीपप्रभादित्याप्रभावभासनासमर्था सती तयाभिभूता भवति तथा स्वयम्प्रकाशमानप्रत्यगभिन्नपरब्रह्मावभासनानर्हतया तेनाभिभूत सत्स्वोपाधिभूताखण्डचित्तवृत्तेर्बाधितत्वाद्दर्पणाभावे मुखप्रतिबिम्बस्य मुखमात्रत्ववत्प्रत्यगभिन्नपरब्रह्ममात्रं भवति।।

## 13. साक्षात्कारोपयोगिनां श्रवणदिनां निरूपणम्

स्वस्वरूपचैतन्यसाक्षात्कारपर्यन्तं श्रवण-मनन-निदिध्यासन-समाध्यनुष्ठानस्यापेक्षितत्वात्तेऽपि प्रदर्श्यन्ते। **श्रवणं** नाम षड्विधलिङ्गैरशेषवेदान्तानामद्वितीये वस्तुनि तात्पर्यावधारणम्। लिङ्गनि तु उपक्रमोपसंहाराभ्यासापूर्वताफलार्थवादोपपत्त्याख्यानि। तत्र प्रकरणप्रतिपाद्यस्यार्थस्य तदाद्यन्तयोरूपपादनम् **उपक्रमोपसंहारौ**। यथा छान्दोग्ये षष्ठाध्याये प्रकरणप्रतिपाद्यस्याद्वितीयवस्तुनः "एकमेवाद्वितीयं" इत्यादौ "ऐतदात्म्यमिदं सर्वं" इत्यन्ते च प्रतिपादनम्। प्रकरणप्रतिपाद्यस्य वस्तुनस्तन्मध्ये पौनः पुन्येन प्रतिपादनम् **अभ्यासः**। यथा तत्रैवाद्वितौयवस्तुनि मध्ये तत्त्वमसीति नवकृत्वः प्रतिपादनम्। प्रकरणप्रतिपाद्यस्याद्वितीयवस्तुनः प्रमाणान्तराविषयीकरणम् **अपूर्वता**। यथा तत्रैवाद्वितीयवस्तुनो मानान्तराविषयीकरणम्। **फलं** तु प्रकरणप्रतिपाद्यस्यात्माज्ञानस्य तदनुष्ठानस्य वा तत्र तत्र श्रुयमाणं प्रयोजनम्। यथा तत्र "आचार्यवान् पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये" इत्यद्वितीय - वस्तुज्ञानस्य तत्प्राप्तिः प्रयोजनं श्रूयते। प्रकरणप्रतिपाद्यस्य तत्र तत्र प्रशंसनं **अर्थवादः** यथा तत्रैव "उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातम्" इत्यद्वितीय वस्तुप्रशंसनम्। प्रकरणप्रतिपाद्यार्थसाधने तत्र तत्र श्रूयमाण युक्तिः **उपपत्तिः**। यथा तत्र "यथा सौम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" इत्यादावद्वितीयवस्तुसाधने विकारस्य वाचारम्भणमात्रत्वे युक्तिः श्रूयते। **मननं** तु श्रुतस्याद्वितीयवस्तुनो वेदान्तानुगुणयुक्तिभिरनवरतमनुचिन्तनम्। विजातीयदेहादि प्रत्ययरहिताद्वितीयवस्तुसजातीयप्रत्ययप्रवाहो **निदिध्यासनम्।** समाधिर्द्विविधः **सविकल्पको निर्विकल्पकश्चेति**। तत्र सविकल्पको नाम ज्ञातृज्ञानादिविकल्पलयानपेक्षयाद्वितीय वस्तुनि तदाकाराकारितायाश्चित्तवृत्तेरवस्थानम्। तदा मृण्मयगजादिभानेऽपि मृद्‌भानवद् द्वैतभानेऽप्यद्वैतं वस्तु भासते। तदुक्तम्-

"दृशिस्वरूपं गगनोपमं परं
सकृद्विभातं त्वजमेकमक्षरम्।
अलेपकं सर्वगतं यदद्वयं
तदैव चाहं सततं विमुक्तमोम्" इति।।

निर्विकल्पकस्तु ज्ञातृज्ञानादिविकल्पलयापेक्षयाद्वितीयवस्तुनि तदाकाराकारितायाश्चित्तवृत्तेर-तितरामेकीभावेनावस्थानम्। तदा तु जलाकारकारितलवणानवभासेन जलमात्रावभासवदद्वितीयव-स्त्वाकाराकारितचित्तवृत्त्यनवभासेनाद्वितीयवस्तुमात्रमवभासते। ततश्चास्य सुषुप्तेश्चाभेदशंका न भवति। उभयत्र वृत्त्यभाने समानेऽपि तत्सद्भावासद्भावमात्रेणानयोर्भेदोपपत्तेः।।

**14. वेदान्तसारमनुसृत्य समाधिस्वरूपं निरूपयत।**

ज्ञेयरूपे चित्तस्य एकाग्रता निश्चलत्वं च समाधिः। स च द्विविधः, - **सविकल्पकः निर्विकल्पकश्च**। तत्र सविकल्पकसाधिदशायां ज्ञातृ-ज्ञान - ज्ञेयानां भेदज्ञानपूर्वकं अद्वितीयब्रह्मास्मीति' तदाकारकारितायाः चित्तवृत्तेः अवस्थानं भवति। अर्थात्, सविकल्पकसमाध्यनुभवकाले ज्ञात्रादिभेदभानस्य वाचारम्भणमात्रत्वात् अद्वैतमेव वस्तु भासते, यथा मृण्मयगजादिभानेऽपि मृद्भानं भवति। एवमेव ब्रह्मजीवात्मक - द्वैतभानेऽपि वाचारम्भणमात्रत्वाद् अद्वैतवस्तु (ब्रह्म) भासते।

सविकल्पकसमाधिस्वरूपं निरूप्य निर्विकल्पकसमाधिस्वरूपम् आह, ज्ञातृ-ज्ञान - ज्ञेयभेदभावभानस्य अभावः, इति अद्वितीये वस्तुनि ब्रह्मणि तदाकारकारितचित्तवृत्तेः अत्यन्तमेकीभावेन अवस्थानम्। यतः दीर्घतराभ्यासात् अस्मिन् समाधौ संस्काराः नश्यन्ति तथा अद्वितीयवस्तुमात्रमवभासते। यथा जलाकाराकारितलवणस्य न पृथक् अवभासः, अपितु जलमात्रस्य एव अवभासो भवति, तथैवात्र समाधौ अद्वितीय वस्त्वाकाराकारितचित्तवृत्तिरपि च पृथक् अवभासते, अपितु वस्तुमात्रमद्वितीयमेव अवभासते।

**15. निर्विकल्पकसामधिप्रसंगे वर्णितं विध्नचतुष्टयम् निरूपयत।**

**उत्तरम्-** 'श्रेयांसि बहुविध्नानि' इति न्यायेन विघ्नास्तु सर्वत्र भवन्त्येव। अत्र निर्विकल्पक - समाधौ चत्वारो विघ्नाः सम्भवन्ति, - लय, विक्षेपः, कषायः, रसास्वदश्च। तत्र आलस्यवशात् चित्तवृत्तिः शब्दरूपादिबाह्यविषयेषु भ्रमति, फलतः अखण्डवस्तुब्रह्माणः प्रत्यगात्मस्वरूपं नावभासते, अपितुनितरां निद्रिता सञ्जायते, एषा स्थितिः **लयः**। अखण्डवस्त्ववलम्बने असमर्था चित्तवृत्तिः यदा बाह्यवस्तु-ग्रहणे प्रवर्तते, तदा '**विक्षेप**' इति संज्ञां लभते। उभयोः लय-विक्षेपविघ्नयोः अभावेऽपि समुत्पन्नरागादिवशात् स्तब्धीभावमापन्ना यित्तवत्रि अद्वितीयवस्तुनः ब्रह्मणः वा अवलम्बने असमर्था भवति, एष **कषायाः**। अखण्डवस्तुब्रह्मणः अवलम्बने चित्तवृत्तिः ब्रह्मानन्दभ्रमेण सविकल्पकसमाधिगतानन्दम् अनुभवति। अस्याः दशायाः नाम **रसास्वादः**। निर्विकल्पकसमाध्यारसम्भकाले यः सविकल्पकानन्दः तद्परित्यगपूर्वकं

त्यक्तुमसमर्थतया पुनस्तस्यैवास्वादनं रसास्वाद्ः, इत्यभिप्रायः।

## 15. A. निर्विकल्पक-समाध्यवस्था-निरूपणम्

अनेन विध्यचतुष्टयेन विरहितं चित्तं निर्वातदीपवदचलं सदखण्डचैतन्यमात्रमवतिष्ठते। तदा निर्विकल्पकः समाधिरित्युच्यते। तदुक्तम्-

"लये सम्बोधयेच्चित्तं विक्षिप्तं शमयेत्पुनः।
सकषायं विजानीयाच्छमप्राप्तं न चालयेत्।।
न स्वादयेद्रसं तत्र निःसङ्गः प्रज्ञया भवेत्" इति।।
"यथा दोपो निवातस्थो नेङ्गते सोपमा स्मृता" इति च ।।

## 16. समाधिसाधनानां निरूपणम्

समाध्यङ्गानि **यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयः**। तत्र "अहिंसासत्यास्तयब्रह्म-चर्यापरिग्रहाः **यमाः**"। "शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि **नियमाः**"। करचरणादिसंस्थानविशेषलक्षणानि पद्मस्वस्तिकादीनि **आसनानि**। रेचकपूरककुम्भकलक्षणाः प्राणनिग्रहोपायाः **प्राणायामः**। इन्द्रियाणां स्वस्वविषयेभ्यः **प्रत्याहरणं** प्रत्याहारः। अद्वितीयवस्तुन्यन्तरिन्द्रियधारणां **धारणा**। तत्राद्वितीयवस्तुनि विच्छिद्य विच्छिद्यान्तरिन्द्रियवत्तिप्रवाहो **ध्यानम्**। समाधि स्तूक्तः सविकल्पक एव।।

## 17. जीवन्मुक्तिः स्वरूपं विवृणुत?

श्रुतिभिः गुरुपदेशेन स्वत्मानुभवेन च जीवब्रह्मैक्यं प्राप्य आत्मगतम् अज्ञानं यदा विनश्यति, तदैव अखण्डब्रह्मसाक्षात्कारो भवति अस्यां दशायां मूलभूतमज्ञानं तत्कार्यभूतानि सञ्चितकर्माणि संशय-विपर्ययादयश्च विनश्यन्ति एवम् अखिलबन्धाद् विनिर्मुक्तः ब्रह्मामात्रे स्थितः ब्रह्मनिष्ठसाधकः जीवन्मुक्तः इत्युच्यते। यथोत्कं स्थितः ब्रह्मनिष्ठसाधकः जीवन्मुक्तः इत्युच्यते।

जीवनमुक्तो नाम स्वस्वरूपाखण्डब्रह्मज्ञानेन तद्ज्ञानबाधनद्वारा स्वस्वरूपाखण्डब्रह्मणि साक्षात्कृतेऽज्ञानतत्तत्कार्यस-ञ्चिकर्मसंशयविपर्ययादीनामपि बाधितत्वादखिलबाधरहितो ब्रह्मनिष्ठः।

यथोक्तं मुण्डकोपनिषदि,

"भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे।"

अर्थात्, आत्मतत्त्वे साक्षात्कृते सति जीवन्मक्तस्य हृदयस्थिताऽहंकाररूपः ग्रन्थिः विनश्यति। अतः ज्ञेयपदार्थविषयकाः समस्तसन्देहाः विनश्यन्ति। सम्पूर्णसञ्चितक्रियमाणकर्माण्यपि नश्यन्ति। इत्थम् 'अहं ब्रह्मास्मि' इति अनुभूतिम् अनुभूयमानः जीवन्नपि मुक्तः पुरुषः 'जीवन्मुक्तः' इत्युच्यते।

जीवन्मुक्तस्य ब्राह्मज्ञानात्पूर्वमेव शन्ति- सन्तोषादिशुभगुणैः अशुभकर्मवासना विनिवार्यते। अतः यथा संसारदशायां यदृच्छाप्राप्तेषु अनुकूलेषु आहारादिषु पृवृतिरासीत्, तद्वदेव ब्रह्मासाक्षात्कारानन्तरमपि शुभेच्छादीनामेव अनुवृत्तिर्भवति। वस्तुतः तस्य जीवन्मुक्तस्य शुभाशुभयोः द्वयो अपि औदासीन्यं भवति, अन्यथा शास्त्रविहितं शुभकर्माण्येव आचरतः न साधकाद् भेदः स्यात्ः तथापि अशुभकर्मसु तस्य कथमपि प्रवृत्तिः न भवति, यता स तु सर्वाणि भूतानि अत्मन्येव विजानाति। अतः रागद्वेषादेः अभावे  जीवन्मुक्तस्य अशुभप्रवृत्तिः नैव सम्भवति।

अयं तु व्युत्थानसमये मांसशोणितमूत्रपुरीषादिभाजनेन शरीरेणान्ध्यमान्द्यापटुत्वादिभाजनेनेन्द्रियग्रामेणाशना-पिपासशोकमोहदिभाजनेनान्तःकरणेन च पूर्वपूर्ववासनया क्रियमाणनि कर्माणि भुज्यमानानि ज्ञानाविरुद्धारब्धफलानि च पश्यन्नपि बाधितत्वात्परमार्थतो न पश्यति। यथेन्द्रजालमिति ज्ञानवांस्तदिन्द्रजालं पश्यन्नपि परमार्थमिदमिति न पश्यति। "सचक्षुरचक्षुरिव सकर्णोऽकर्ण इव" इत्यादिश्रुतेः। उक्तं च...

सुषुप्तवज्जाग्रति यो न पश्यति
द्वयं च पश्यन्नपि चाद्वयत्वतः।
तथा व कूर्वन्नपि निष्क्रियश्च यः
स आत्मविन्नान्य इतीह निश्चयः।। इति।।